# पद्मपुराणे मोक्षस्य अवधारणा

**तरणीकुमारपण्डा**

मुख्यशब्दाः (उपोद्घातः–मुक्तेः संज्ञा–तीर्थस्नानेन मुक्तिः–व्रतानुष्ठानेन मुक्तिः–उपदेशपालनेन मुक्तिः–नारीसम्मानप्रदर्शनेन मुक्तिः–स्मरणेन मुक्तिः–अर्चनेन मुक्तिः–नामसंकीर्त्तनेन मुक्तिः–साधुसङ्गमेन मुक्तिः–हरिजागरणेन मुक्तिः–उपसंहार)

**उपोद्घातः**

भारतीयसंस्कृतेः वाङ्मयं मुकुरं भवति पुराणसाहित्यम्। साहित्यमिदं ब्रह्मण्यसंस्कृतेः धारकं वाहकञ्च भवति। अभिजात–आर्यचैतन्यस्य उत्समुखात् पुराणस्य कतासरितं प्रवाहितं भवति। यथा वैदिकधर्मस्य स्वरूपं ज्ञातुं वेदस्यास्ति अपेक्षा तथा धर्मशास्त्रस्य आवश्यकता विद्यते तथैव भारतस्यास्यतीतज्ञानाय अत्युपयोगिनां पुराणानां पर्यालोचनम् अनविर्यं वर्तते। भारतीयजनतासु धार्मिकविधानाय, सांस्कृतिककृत्याय, सामाजिकोपकाराय, आध्यात्मिकज्ञानाय च पुराणेभ्यः पर्याप्ता प्रेरणा प्राप्यते। तस्मात् पुराणसाहित्यं हि भारतस्यास्ति उमूल्यो निधिः। उच्यते **'पुरां नवं भवति इति पुराणम्'** संसाराण्येऽस्मिन् बंभ्रम्यमाणानां जीवानां कृते पुराणम् अस्ति सरलः आलोकमार्गः। परमतत्वदृष्ट्या पुराणं हि अवश्यमेव मोक्षशास्त्रम्। अष्टादश पुराणेषु पद्मपुराणस्य एकं विशिष्टस्थानम् अस्ति। मोक्षप्रदायके, सर्वपापहरे अस्मिन् पुराणे जीवस्य परमकाम्ये मुक्तिविषये विविधसरलमार्गस्य वार्ता उद्घोष्यते। वस्तुतस्तु जीवः अविद्यावशात् करोति तदर्थं स पुनः पुनः जन्ममरणचक्रं याति आयाति च। संसारपाशेन आवद्धः सन् जीवः बहुविधं दुःखं सहते। केवलं पद्मपुराणस्य निर्देशितमार्गेण तददुःखम् सुकरभावेन निराकृतं भवति अर्थात् जीवः मुक्तिभाक् भवति। तस्मात् अस्य पुराणस्य उपदेशः सर्वथा पालनीयः। अत्र तीर्थस्नान–व्रतानुष्ठान–





उपदेशपालन–नारीसम्मानप्रदर्शन–स्मरणन–अर्चन–नामसंकीर्तन–साधुसङ्गमादिभिः जीवस्य मोक्षलाभविषयो वर्णितः भवति। अपि च तर्पण–देवप्रन्नताविधान–विप्रसेवादिभिः उपायैः रम्यभावेन मुक्तेः आलोचनं प्राप्यतेऽस्मिन् पुराणे। शोधसन्दर्भेऽस्मिन् स्वचिन्तनं मया उपस्थाप्यते।

**मुक्तेः संज्ञा**

धर्मादिषु चतुर्बिधपुरुषार्थेषु मोक्षः हि श्रेष्ठःपुरुषार्थः। मोक्षशब्दस्य पर्यायवाचकशब्दः भवति मुक्तिः। का भवति मुक्तेः संज्ञा? उच्यते यदा जीवः भोगासक्तिसम्पन्नं जडदेहं त्यत्त्वा आत्मस्वरूपं जानाति तदा तस्य मुक्तिर्भवति। भागवतपुराणे उल्लिखितम् अस्ति–

'मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः।'१

अपि च निरालम्ब उपनिषदि कथ्यते–

'नित्यानित्यवस्तुविचारादनित्यसंसारसमस्तसंकल्पक्षयो मोक्षः।'

अर्थात् यदा वस्तुविचारेण नित्यं वस्तु निर्णितं भवति तदा अनित्यसंसारस्य समुदयसंकल्पस्य विनाशो भवति। सकलसंकल्पनाशात् जीवस्य मुक्तिर्भवति। पुराणे पञ्चविधाः मुक्तयः उल्लिखिताः सन्ति। ताः खलु यथा– सालोक्यमुक्ति, समीप्यमुक्तिः, सायुज्यमुक्तिः, सार्ष्टिमुक्तिः, सात्मतामुक्तिश्च। पद्मपुराणे एतादृश्यः मुक्तयः परिलक्ष्यन्ते।

**तीर्थस्नानेन मुक्तिः**

अमरकण्टके पर्वते जालेश्वरः महादेवः विद्यमानः। अत्र मृतजनस्य पुनर्जन्म न भवति–

तत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः।[2]

सर्वपापनाशके स्कन्दतीर्थे अवगाहनेन आजन्मकृत–पापानां विनाशे भवति अर्थात् स जीवः मोक्षास्पदं भवितुम् अर्हति।[3] अपि च अयोनिसङ्गमं गमनात् जीवः योनिमन्दिरं न पश्यति अर्थात् मातृजठरे स न पुनर्जायते–

अयोनिसङ्गमे स्नात्वा न पश्येद् योनिमन्दिरम्।[४]

मोक्षप्रदायके भृगुतीर्थे उपसनाकृते सति गृह्यातिगृह्य-ब्रह्मज्ञानेन लभ्यमुक्तिं लभते। सर्वपापनाशने क्षेत्रेऽस्मिन् स्नातः मानवः लीलया स्वर्गं गच्छति। तस्माद् न स पुनर्जायतेः।[५] परमं ब्रह्मस्वरूपं भगवन्तं श्रीहरिं यः भक्तिपूर्वकम् अर्चयति, स मुमुक्षुजनः निश्चितरूपेण मुक्तिं लभते। यतः भगवान् श्रीहरिः हि मनसः ग्राह्यम्, चक्षुरादीन्द्रियाणां विषयस्वरूपः, बुद्ध्या परिच्छेदश्च। पृथिव्या उच्यते-

त्वामाराध्य परं ब्रह्म याता मुक्तिं मुमुक्षवः।[६]

**व्रतानुष्ठानेन मुक्तिः**

यः नरः नारी वा पूर्णिमायां तिथौ विधिपूर्वकं पूर्णिमाव्रतानुष्ठानं करोति, स सर्वपापेभ्यः मुक्तः सन् ब्रह्मसारूप्यं लभतेगयाक्षेत्रस्य धर्मपृष्ठे, ब्रह्मसरोवरे उत गयाशिरोवटे यः श्राद्धदानं करोति स अक्षयं पुण्यं लभते।[७] अपि च यः मानवः निवापदानार्थं मार्गम् अतिक्राम्यति, स तस्य नरकस्थ-पितृपुरुषान् स्वर्गे प्रेरयितुं समर्थो भवति। तस्य कुले न कोऽपि प्रेतत्वं प्राप्नोति। पिण्डदानात् तस्य प्रेतत्वमपि अपगतं भवति। अन्ते च स मोक्षभावं प्राप्नोति। अस्मिन् पुराणे उल्लिखितम् अस्ति-

प्रेतत्वं मोक्षभावञ्च पिण्डदानाच्च गच्छति।[८]

मुक्तिकामी जीवः स्मरणोपवास-ध्यान-धारणा-पूजोपहारैश्च अपबर्गं लभते। दानवा उच्यन्ते-

स्मरणेनोपवासेन ध्यानधारणा तथा।
पूजोपहारे च कृते अपवर्गस्तु लभ्यते॥[९]

भाद्रे मासि उभयपक्षे यः सपत्नीकः मानवः राधा-कृष्णाष्टमीव्रतानुष्ठानं करोति, स हरेः सान्निध्यं प्राप्नोति। इयं मुक्तिः अवश्यमेव सामीप्यमुक्तिः इत्यत्र नास्ति सन्देहावसरः। यः मानवः जयन्तयां तिथौ उपवासं कृत्वा सदैव हरिव्रतानुष्ठानं करोति, स विष्णोः वैकुण्ठधामं निश्चितमेव गन्तुं शक्नोति। न केवलं तिथिरियं विधिपूर्वकं पालनेन मोक्षार्थी मोक्षलाभे समर्थो भवति। अत्र सालोक्यमुक्तेः आलोचनं प्राप्यते-





भाद्रे वै चोभये पक्षे यः करोति स भार्य्यकः।
राधाकृष्णाष्टमीं वत्स प्राप्नोति हरिसन्निधिम्॥
व्रतञ्च पुण्यकारञ्च यः करोति सदा हरेः।
स याति विष्णेर्वैकुण्ठं जयन्तीसमुपोषकः॥[१०]

**उपदेशपालनेन मुक्तिः**

मोक्षलाभकृते सति आर्हतानाम् उपदेशाः पालनीयाः। सर्वः आर्हतधर्म एव मुक्तेः अपावृतद्वारस्वरूपः। आर्हतः हि मुक्तेः प्रदाता अर्थात् मुमुक्षुजीवेभ्यः मुक्तिं प्रयच्छति। अस्मात् परमः पुरुषः न कोऽपि अस्ति। आर्हतधर्मानुष्ठाता स्वर्गं अपवर्गञ्च अनायासेन लभते। तस्मात् तेषां उपदेशाः अवश्यमेव आचरणीया। पुराणेऽस्मिन् उल्लिखितम् अस्ति-

कुरुध्वं मम वाक्यानि यदि मुक्तिमणीप्सथ।
आर्हतं सर्व्वमेतच्च मुक्तिद्वारमसंवृतम्॥
धर्म्मद्विमुक्तेरर्होऽयं नैतस्मादपरः परः।
अत्रैवावास्थिताः स्वर्गं मुक्तिं चापि गमिष्यथ॥[११]

वाराणस्याः पुण्यसलिलेषु अवगाहनकृते सति मानवः जन्मबन्धनात् मुक्तं भवति-

स्नात्वा तु सलिले तत्र मुच्यते जन्मबन्धनात्॥[१२]

यः क्षेत्रवासी विप्रगणः निर्ममः, निरहंकारी, निःसङ्गः, निष्परिग्रहः, बन्धुवर्गेषु स्नेहशून्यः, तुल्यदर्शी, विविधैः कर्मभिः भूतस्य अभयप्रदः, नित्यः, प्राणायामपरायणः, परमब्रह्म-ध्याननिष्ठः, यागशीलः शुचिः, नित्यः यतिधर्मनिरतः, सांख्ययोगविधिज्ञः, धर्मज्ञः छिन्नसंशयश्च भवति, स विधिपूर्वकं पूजनेन पौष्कारण्ये अक्षयंफलं प्राप्नोति। येन स न कदापि पुनर्जायते अर्थात् स दुरासदं अक्षयं ब्रह्मसायुज्यं लभते-

व्रजन्ति ते सुदुष्प्रापं ब्रह्मसायुज्यमक्षयम्।
यत् प्राप्य न पुनर्जन्म लभन्ते मृत्युदायकम्॥[१३]

**नारीसम्मानप्रदर्शनेन मुक्तिः**

येः मानवाः परदारेषु मातृवत् पश्यन्ति अर्थात् सम्मानं प्रदर्शयन्ति, ते कदापि यमयातनाम् उत मृत्युयातनां न सहन्ते। न केवलं तद् येषां चिते परदारेषु आसक्तिं न जायते, ते देवलोकं अवश्यमेव गच्छन्ति, यममन्दिरं ते न प्रविशन्ति। अस्मिन् पुराणे परदारान् प्रति सम्मानप्रदर्शनेन मुक्तिवर्णनं प्राप्यते, यद् आधुनिक-समाजमनस्कतायां संकेतं निर्देशयति। उच्यते-

मातृवत् परदारान् ये मन्यन्ते वै नरोत्तमाः।
न ते यान्ति नरश्रेष्ठ कदाचित् यमयातनाम्॥[१४]

**स्मरणेन मुक्तिः**

विष्णुभक्तिरेव भवाम्बुधिं सन्तरणस्य अन्यतमः सुकरोपायः। ये मानवाः प्रसङ्गक्रमेणापि भगवन्तं केशवं स्मरन्ति, तेषाम् अखिलम् अघनिचयं क्षणादेव विनश्यति, अन्ते च ते विष्णोः परमपदं गच्छन्ति।[१५]

**अर्घनेन मुक्तिः**

शालग्रामशिलार्चनं मोक्षजनकमेकं कर्म। यः मानवः तीर्थ-दान-यज्ञ-ब्रह्मज्ञानेषु असमर्थो भवति, स केवलं शालग्रामशिलाम् अर्चनेन मुक्तिं व्रजति-

मुक्तिं यान्ति वैश्य शालग्रामशिलार्च्चनात्।[१६]

शालग्रामशिलाजलं विन्दुवत् यदि कोऽपि पिवति, स विष्णुभागी मानवः पुनः न मातृस्तन्यं पिवति अर्थात् स देहधारणं न करोति। स निश्चितमेव मुक्तिं प्राप्नोति-

शालग्रामशिलातोयं यः पिवेद्विन्दुना समम्।
मातृस्तन्यं पुनर्नैव स पिवेद्विष्णुभाङ् नरः॥[१७]

देहान्तकाले अतीव भाग्यवतः मानवस्य एव वाक्येषु हरेः नाम हृदि च शालग्राशिला अवस्थानं करोति। यस्य मानवस्य मरणकाले हृद्मार्गे शालग्रामशिलां प्रकाशते, स निश्चितमेव मुक्तिं प्राप्नोति-





प्राणान्तकाले पुंसस्तु भवेद्भाग्यवतो नृप।
वाचि नाम हरेः पुण्यं शिला तदन्तिके॥
गच्छत्सु प्राणमार्गेषु यस्य विस्रम्भतोऽपि चेत्।
शालग्रामर्स्मृतिस्तस्य मुक्तिर्न संशयः॥[१८]

न केवलं तद् ब्रह्महननादिपापं कोटि प्राणिवधजितं पापञ्च शालग्रामशिला स्पर्शमात्रमेव भस्मीभूतं भवति अर्थात् पापमूलं विनश्यति। अपि च यः मानवः हरिप्रिये कार्तिके मासि वकपुष्पैः मधुसूदनम् अर्चयति, भगवतः हरेः अपारकृपया स देवदुर्लभं मोक्षं प्राप्नोति। तस्मात् हरिपूजनं पवित्रं कर्तव्यमेकम्। पद्मपुराणे उल्लिखितमस्ति-

कार्तिके मुनिपुष्पैर्यः पूजयेन्मधुसूदनम्।
देवानां दुर्लभं मोक्षं प्राप्नोति कृपया हरेः॥[१९]

अस्मिन् जगति भगवतः श्रीकृष्णस्य चरणार्पितं पत्रपुष्पादि किमपि द्रव्यं सर्वान् पवित्रं करोति। पञ्चविधा पूजा भवन्ति तद् यथा-अभिगमन-उपादान-योग-स्वाध्याय-इज्या इति। एभिः कर्मेभिः श्रीभगवतः अर्चनकार्यं भवन्ति। पञ्चविधेन अर्चनमाध्यमेन यशक्रमेण सार्ष्टि-सामीप्य-सालोक्य-सायुज्य-सारूप्यमुक्यश्च भवन्ति। तस्मात् ासु पञ्चपूजासु काचित् अवलम्ब्य मुमुक्षुजनः मुक्तिं लभते।[२०] शालग्रामोद्भव-देवस्य द्वारकोद्भव-देवस्य च यत्र सम्मिलनं जायते तत्र मुक्तिः अनिवार्य्या इत्यत्र नास्ति संशयः-

शालग्रामोद्भवो देवो यो देवो द्वारकोद्भवः।
उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः।।[२१]

**नामसंकीर्त्तनेन मुक्तिः**

यदि राम इति पवित्रं नाम सकृत् कर्णविवरं प्रविशति तर्हि तत्क्षणादेव पापानि विनश्यति। विषयोऽयं दृष्टान्तेन वर्ण्यते यथा अग्निः तुलाराशिम् अनयासेन नाशयति तथैव राम इति नाम सर्वं पापं क्षणादेव विनश्यति। यस्य मस्तके तुलसीपत्रम्, हृदये मनोहारी शिला, वदने

कर्णाभ्याञ्च सुमधुरं राम इति नाम स्फुरनं श्रवणं भवति तर्हि उद्दिष्टजनः निश्चितमेव संसारबन्धनात् मुक्तं भवति-

तुलसी मस्तके यस्य शिला हृदि मनोहरा।
मुखे कर्णऽथवा राम-नाम मुक्तस्तदैव सः॥[२२]

**साधुसङ्गमेन मुक्तिः**

अस्मिन् पुराणे मोक्षलाभस्य उपायरूपेण साधुसङ्गमस्य वार्ता प्राप्यते। यतः साधुसङ्गगुणात् शास्त्रश्रवणं भवति। यस्यार्थं हरिभक्तिः जायते। अस्याः हरिभक्त्याः तत्त्वज्ञानं जायते। अपि च अस्मात् ज्ञानात् सतिः भवति। तस्मात् मुमुक्षुजनस्य साधुसङ्गमं नित्यं कर्तव्यम्। भगवता व्यासदेवेनोच्यते-

साधुसङ्गाद्भवेद्विप्र शास्त्राणां श्रवणं प्रभो।
हरिभक्तिर्भवेत्तस्मात्ततो ज्ञानं ततो गति॥[२३]

**हरिजागरणेन मुक्तिः**

गीत-वाद्य-नृत्य-पुराणपाठ-धूप-दीप-नैवेद्य-पुष्प-पत्र-गन्धनुलेपन-पल-अर्घ्य-श्रद्धा-दान-इन्द्रियनिग्रह-सत्य-निद्राराहित्य-हर्ष-सदनुष्ठानानादिनी हरिजागरणे आवश्यककर्माणि। जागरणमिदम् अवगते सति जनार्द्दनदेवलाभं सुकरं भवति। अस्मिन् क्षेत्रे आश्चर्य्यः विषयोऽयं यद् उत्साहं प्रकाशनं कुर्यात्। तेन सह आलस्यं परित्यजेत्। अनिर्विन्नचित्ते प्रदक्षिणं नमस्कारं नीराजनं च कर्तव्यम्। यः मानवः एकाग्रचित्ते भगवतः प्रीत्यर्थं यथाविहितं जागरणं करोति, तस्यापि पुनर्जन्म न भवति। ईश्वरेणोच्यते-

एतैर्गुणैः समायुक्तं कुर्य्याज्जागरणं विभोः।
एकाग्रमानसो यस्तु न पुनर्ज्जायते भुवि॥[२४]

यः मानवः विष्णोः जागरणवासरे भक्त्या वित्तशाठ्यं त्यत्त्वा हरिजागरणं कराति, स पुनर्गतिं लभते। यश्च कार्त्तिके मासि पञ्चरात्रोक्तविधानेन नित्यं विष्णुपूजनं करोति, स अवश्यमेव मुक्तिभाक् भवति। अपि च उच्यते यः मानवः कार्त्तिके मासि सहस्रं हरिनामानि





करोति, तेन सह गजराजस्य मोचनवृत्तान्तं पठति, तस्यापि पुनर्जन्म न भवति-

हरेर्नामसहस्रञ्च गजराजस्य मोक्षणम्।
कार्त्तिके पठते यस्तु पुनर्जन्म न विन्दति॥[२५]

एवं प्रकारेण एव तीर्थदर्शन-स्नान-नामसंकीर्त्तन-अर्चन-तर्पण-तीर्थमारण-श्राद्धदान-समदर्शित्व-श्रद्धादीनां वर्णनं प्राप्यन्ते। एते उपायाः मुमुक्षुजनस्य समीपे अबश्यमेव अनुकरणीयाः।

**उपसंहारः**

परिशेषे उच्यते यत् संस्कृतसाहित्यवारिधेः महामूल्यं रत्नं भवति पुराणशास्त्रम्। भारतीय-सभ्यताचार विचाराणां जनतायां येन साहित्येन प्रचारं कृतम्, तत्तु पौराणिकं साहित्यम् एव। साहित्येऽस्मिन् वेद-विहितानां धर्माणां सुखबोध्यभाषायां वर्णनं प्राप्यते। तस्मात् धार्मिकदृष्ट्या पुराणानामस्ति अधिकं महत्त्वम्। मानवगणः श्रवणपुटाभ्यां यस्यामृतं विन्दुमात्रं पीत्वापि निर्वाणपदवीम् अलंकरोति, तद् भवति वाक्यसुधाधारासारस्वरूपं पद्मपुराणम्। पुराणमिदं सुवृहत् प्रक्षेपविहीनं स्वस्वरूपे सुरक्षितं च सात्त्विकपुराणं भवति। अस्य महापुराणसस्य पुण्योदकेन सिक्तः सन् मुक्तिकामी मानवः सुदुर्लभं मोक्षपदं प्राप्तुं शक्यते। अत्र तीर्थस्नान-व्रतानुष्ठान-उपदेशपालन-नारीसम्मानप्रदर्शन-स्मरणन-अर्चन-नामसंकीर्त्तन-साधुसङ्गमादिभिः जीवस्य मोक्षलाभविषयो वर्णितः भवति। अपि च तर्पण-देवप्रन्नताविधान-विप्रसेवादिभिः उपायैः रम्यभावेन मुक्तेः आलोचनं प्राप्यतेऽस्मिन् पुराणे एतद् न केवलम् अत्र स्नान-याग-तर्पण-आराधनादिकार्यैः मोक्षविषये विशेषवर्णनं प्राप्यते। मुमुक्षुमानव निकषा एते उपायाः अनुकरणीयाः। अतः जीवः मोक्षप्रदायकस्य पद्मपुराणस्य समीपे अधमर्णः वर्तते इत्यत्र नास्ति संशयः। मुक्तिविषयकम् आलोचनमिदं दिग्विस्मृत-मुमुक्षुजनस्य सकाशे उज्ज्वलवर्त्तिकास्वरूपम्।

——

**तथ्यसूत्राणिः**

१. भागवतपुराणम् (२/१०/६)
२. पद्मपुराणम् (स्वर्गखण्डम्/७/११९)
३. तत्रैव (स्वर्गखण्डम्/९/५२)
४. तत्रैव (स्वर्गखण्डम्/९/६१)
५. तत्रैव (स्वर्गखण्डम्/९/२१६)
६. तत्रैव (सृष्टिखण्डम्/३/३७)
७. तत्रैव (सृष्टिखण्डम्/७/२७)
८. तत्रैव (सृष्टिखण्डम्/११/७४)
९. तत्रैव (सृष्टिखण्डम्/१३/३३८,३३९)
१०. तत्रैव (ब्रह्मखण्डम्/४/४५,४६)
११. तत्रैव (सृष्टिखण्डम्/१३/३४९,३५०)
१२. तत्रैव (सृष्टिखण्डम्/१४/२०७)
१३. तत्रैव (सृष्टिखण्डम्/१५/१९६)
१४. तत्रैव (सृष्टिखण्डम्/१५/१३०)
१५. तत्रैव (स्वर्गखण्डम्/१५/१४७)
१६. तत्रैव (स्वर्गखण्डम्/१५/१७५)
१७. तत्रैव (स्वर्गखण्डम्/१५/१८८)
१८. तत्रैव (पातालखण्डम्/११/३७,३८)
१९. तत्रैव (ब्रह्मखण्डम्/३/६)
२०. तत्रैव (पातालखण्डम्/४७/१६)
२१. तत्रैव (पातालखण्डम्/४८/१४)
२२. तत्रैव (पातालखण्डम्/११/८०)
२३. तत्रैव (ब्रह्मखण्डम्/१/६)
२४. तत्रैव (उत्तरखण्डम्/१२४/१५)
२५. तत्रैव (उत्तरखण्डम्/१२४/२०)





**ग्रन्थसन्दर्भाः**


१. उपाध्याय, बलदेव, पुराणविमर्ष, चौखम्बाप्रकाशन, वाराणसी, १८१७ (तृतीय संस्करण), मुद्रित।
२. वसु गिरीन्द्रशेखर, पुराण प्रवेश, विवेकानन्द वुक सेन्टार, कोलकाता, २०१२ मुद्रित।
३. पद्मपुराण (स्वर्गखण्ड) सम्पा. पञ्चानन तर्करत्न, नवभारत पावलिशार्स, कोलकाता, १४२०, मुद्रित।
४. मार्कण्डेयपुराण, सम्पा. पञ्चानन तर्करत्न, नवभारत पावलिशार्स, कोलकाता, १४२१, मुद्रित।
५. लिङ्गपुराण, सम्पा. पञ्चानन तर्करत्न, नवभारत पावलिशार्स, कोलकाता, १४२१, मुद्रित।
६. शास्त्री, माधवाचार्य, पुराण दिग्दर्शन, माधवापुस्तकालय, दिल्ली, १९५८ ख्रीष्टाब्द मुद्रित।
७. Bhattacharya, Srimohan and Bhattacharya, Dinesh Chandra, Bharatiya Darsana Kosa (Vedanta), Calcutta, Sanskrit College, (Vol 3, part 1, 1981) Calcutta Research Series No. 124), print.
८. Banerji, Sures Chandra, A Companion to Sanskrit Literature, MLBD, Delhi, 1989 (2nd ed.), print.
९. Williams, M., Monier, A Dictionary English and Sanskrit, Motilal Banarasidas Publishers Private Ltd., Delhi, 2012, (reprint), print. Kolkata, 1954 (1st ed.), print.

# वेदाध्ययने अधिकारनिर्णयः

ड. निरञ्जन मिश्रः

**उपोद्घातः**

अनन्तज्ञानचक्रस्य निधिः वेदः। भारतवर्षस्य भारतीयसंस्कृतेश्च भास्वरं रत्नं भवति वेदः। वैदिकवाङ्मयं सम्पूर्णेऽस्मिन् विश्वसाहित्ये प्राचीनतममिति सर्वे विद्वांसः सामनरूपेण स्वीकुर्वन्ति। विपश्चिदपश्चिमेभ्यः नास्ति तिरोहितं यत् वेदा एव सर्वप्राचीनतमा वाङ्मयस्वरूपा इति। प्राच्याः प्रतीच्याश्च विद्वांसः ऐक्यमत्येन स्वीकुर्वन्ति यत् वेदः न केवलं भारतीयानाम् अपि तु विश्वस्मिन् विश्वे कमनीयकल्पद्रुमरूपेण विभाति। सम्पूर्णे विश्वे यत् किमपि साहित्यं यावत्यः भाषाः वा समुपलभ्यन्ते तेषु साहित्येषु, तेसु भाषासु च वेदाः पुरतना इति नास्ति लेशतोऽपि सन्देहः। वेदस्य व्यापकत्वविषये न कोऽपि दृढतया वक्तुं समर्थः। वेदानां सर्वज्ञानमयत्वम् उररीकृतं मनुना अतः उक्तम्-

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥ (म.स्मृ., २.७)

अयं वेदः भारतीयानाम् आत्मिकजीवनस्य सदाचारस्य संस्कृतेश्च प्रीतकभूतो विद्यते। अस्माकं संस्कृतेः मूलस्रोतोऽस्त्ययं वेदः। प्राचीनतमाः पावनातिशयाः प्रामाणिकाश्च ग्रन्थाः वेदाः एव भवन्ति। आधुनिकविज्ञानस्य मूलस्रोतः भवति वेदः। धर्मार्थकममोक्षाणां विशदं वर्णनं समुपलभ्यते वेदे। अध्यात्मदर्शनस्य रहस्यम्, ज्ञानस्य चरमं लक्ष्यम्, मानवजीवनस्योद्देश्यं किमिति एतासां सर्वासां निराकाराणोपायाः वेदे एव विराजन्ते। सर्वेषां दर्शनानां लोकन्यायानाञ्च निधिभूताः मूलभूताश्च सन्ति वेदाः।

तत्रादौ वेदाध्ययने केषामधिकारः, केषां नाधिकारः इत्यस्मिन् विषये महती चर्चा प्रचलति। यदि शास्त्रानुमेदितानि वाक्यानि





अनुशीलायामः तर्हि केषामधिकारः, केषां नाधिकारः इति विषये ज्ञातुं शक्यते। अन्यथा आक्षेपप्रत्याक्षेपेण कालो गच्छत्येव। अतः मया अत्र विषयेऽस्मिन् केचन मन्त्राणां तथा स्मृत्यादिवचनानां प्रमाणत्वेन उररीकृत्य एतस्य समाधानार्थं प्रयत्नः विहितः। तदीदानीं प्रस्तूयते।

**विषयप्रवेशः**

## १. शुक्लयजुर्वेदः

### १.१. माध्यन्दिनसंहिता

तत्रादौ यजुर्वेदीयमन्त्रस्य उव्वटादिभाष्यकाराणामभिमतपुरः सरं परिशीलयामः। यथा-

यथेमां वाचं कल्याणीमावदानि जनेभ्यः।
ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च।
प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः-
समृद्ध्यतामुप मादो नमतु।। (माध्य., २६.२)

**उव्वटभाष्यम्**

यथा इमां वाचं कल्याणीं अनुद्वेजिनीम् दीयतां भुज्यतामित्येवमादिकाम्। आवदानि जनेभ्योऽर्थाय। के ते जना इत्यत आह। ब्रह्मराजन्याभ्यां ब्राह्मणाय राजन्याय च शूद्राय च अर्याय च। अर्यो वैश्यः। स्वाय चात्मीयाय च। अरणः अपगतोदकः पर इत्यर्थः। आवदानीति सर्वत्र सम्बध्यते। प्रियो देवानाम्। अवसानरहितानुष्टुप्। यथेमां वाचमिति यथाशब्दयोगात्तथाशब्दोऽत्राध्याहर्तव्यः। तथा तेन प्रकारेण प्रियो देवानां भूयासम्। दक्षिणायै दक्षिणाया दातुश्च इहास्मिन्नेव काले प्रियो भूयासम्। अयमिति कामनामग्रहणम्। तद्यथा अयं ग्रामलाभकामः अस्मै मे समृद्ध्यताम्। किञ्च उपमा अदः नमतु। अद इति यः कामः इष्यते स उच्यते। तद्यथा उपनमतु मां प्रति देवदत्तः।

अत्र तु उव्वटेन मन्त्रस्य यथार्थप्रत्यपादि। अत्र व्याख्याने शूद्राणां नारीणां च वेदाध्ययनविषये किमपि न प्रतिपादितः।

**महीधरभाष्यम्**

इमां कल्याणीमनुद्वेगकरीं वाचमहं यथा यतः आवदानि सर्वतो ब्रवीमि दीयतां भुज्यतामिति सर्वेभ्यो वच्मि। केभ्यस्तदाह। ब्रह्मराजन्याभ्यां ब्राह्मणाय राजन्याय क्षत्रियाय च शूद्राय अर्याय वैश्याय स्वायात्मीयाय अरणाय पराय। अरणोऽपगतोदकः शत्रुः नास्ति रणः शब्दो येन सह, वाक्सम्बन्धरहितः शत्रुरिति वा। प्रियो देवानां मध्येऽवसानरहितानुष्टुप् लौगाक्षिदृष्टा। यथेति पूर्वोक्तेरत्र तथाशब्दोऽध्याहार्यः। यतोऽहं ब्राह्मणादिभ्यः कल्याणीं वाचं वदामि तथा ततोऽहं देवानां प्रियः भूयासम्। इह संसारे दक्षिणायै दक्षिणायाः दातुश्च प्रियः भूयासम्। देवा दक्षिणादातारश्च मयि प्रीतिं कुर्वन्तिवत्यर्थः। किञ्च मे ममायं कामः समृद्ध्यतां सफलो भवतु। अयमिति नामनिर्देशः। धनपुत्रादिलाभकामो मे सम्पद्यतामित्यर्थः। किञ्च अदो मा मामुपनमतु। अद इति दृष्टनामग्रहणम्। देवदत्तादिर्मां प्रीणयतु।

मन्त्रेऽस्मिन् महीधरेणाऽपि कुत्रापि शूद्राणां वेदाध्ययने अर्हता विषये न उल्लिखितम्।

दयानन्दभाष्यम्–

यथेमां वाचं कल्याणीमावदानि..........(माध्य., २६.२)

**पदार्थ**

हे मनुष्यो! मैं ईश्वर जैसे (ब्रह्मराजन्याभ्यां) ब्राह्मण, क्षत्रिय, (अर्याय) वैश्य, (शूद्राय) शूद्र च और (स्वाय) अपने स्त्री सेवकादि (चारणाय) और उत्तमलक्षणयुक्त प्राप्त हुए। अन्त्यज्ञ के लिये भी (जनेभ्यः) इन उक्त सब मनुष्यो के लिये (इह) इस संसार में (इमाम्) इस प्रकट की हुई (कल्याणीम्) सुख देने वाली (वाचम्) चारो वेदरूप वाणी का (आवदानि) उपदेश करता हु। वैसे आप लोग भी अच्छे प्रकार उपदेश करें।

जैसे मैं (दातुः) दान देने वाले के संसर्गी (देवानाम्) विद्वानों की (दक्षिणायै) दक्षिणा अर्थात् दान आदि के लिये (प्रियः) मनोहर





पियारा (भूयासम्) होऊं और मेरी (अयम्) यह (कामः) कामना (समृद्धताम्) उत्तमता से बढे तथा (मा) मुझे (अदः) वह परोक्षसुख (नमतु) प्राप्त हो वैसे आप लोग भी होवें और वह कामना तथा सुख आप को भी प्राप्त होवे।

**भावार्थ**

इस मन्त्र में उपमालङ्कार है। परमात्मा सब मनुष्यो के प्रति इस उपदेश करता है कि यह चारों वेदरूप कल्याणकारिणी वाणी सब मनुष्यो के हित के लिये मैने उपदेश की है, इसमे किसी को अनधिकार नही है, जैसे मै पक्षपात को छोड के सब मनुष्यो मे वर्तमान हुया हुँ, वैसे आप भी हो जाओ। ऐसे करने से तुम्हारे सब काम सिद्ध होंगे।

यहां पर भी विचार किया जाए तो भाष्यकर्ता मन्त्रो का भावार्थ प्रसङ्ग मे अतिरिक्त अर्थ को भी जोडे हैं जो कि मन्त्र मे अनभिहित है। जैसे कि आपलोग भी अच्छेप्रकार चारो वेदरूपवाणी का उपदेश करे, ये वाक्य मन्त्र मै अनुच्चारित है।

**१.२. काण्वसंहिता**

मन्त्रोऽयं काण्वसंहितायाः अष्टाविंशोऽध्याये द्वितीयतृतीयमन्त्रे च वर्णितः। यथा–

सकामा अध्वनस्कुरु सज्ञानमस्तु मेऽमुना।
यथेमां वाचं कल्याणीमावदानि जनेभ्यः। (का.सं., २८.२)
ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च।
(का.सं., २८.३)

**आनन्दबोधभाष्यम्**

यथा येन प्रकारेण इमां कल्याणीं श्रीभगवद्विष्णुमयत्वेन मङ्गलात्मिकां कल्याणीम्। अनुद्वेगकरीं दीयतां भुज्यतामिति वाचम् एव आवदानि। जनेभ्यः जनेभ्योऽर्थाय प्रवक्ष्यामि। तथैव हे वाग्देवी, त्वं मम वाचं सम्पूरयेत्यर्थः।

के ते जनाः इत्याह *ब्रह्मराजन्याभ्याम्* इति। अत्र अर्धश्चैको मन्त्रो लिङ्गोक्तदेवत्या गायत्री। एकमन्त्रपक्षे वाग्देवत्या गायत्रीप्रगाथः। ब्रह्मराजन्याभ्यां ब्राह्मणक्षत्रियाभ्यां यत् ब्रवीमि तदाह। इमां वाचं कल्याणीमावदानि। शूद्राय इमां वाचं कल्याणी वाचमावदानि। अर्याय च वैश्याय च इमां वाचं कल्याणीम् आवदानि। स्वाय आत्मीयाय अरणाय रक्षित्रे च इमां कल्याणीमेव वाचमवदानि। 'प्रियो देवानाम्' इति। लिङ्गोक्तदेवत्या अनवसाना अनुष्टुप्। ऋषिस्तु लौगाक्षिः। प्रियो देवानाम्। पूर्वत्र यथा सत्यवादित्वं मे मम तथैव देवानां प्रियः अहं देवेभ्य इमां कल्याणीमेव वाचमवदानि। दक्षिणायै दातुः। दातुः दानं कुर्वतो यजमानस्य दक्षिणायै दक्षिणाप्रदानाय कल्याणीमेव वाचमवदानि। इह भूयासम्। इह येषु प्रवृत्तिविषयेषु अहं भूयासं येन कल्याणवादी भूयासं भवेयम्। अयं मे मम कामः समृद्ध्यताम्। अयम् इति कामनाग्रहणम्। तद्यथा (अयम्) ग्रामलाभकामोऽस्मै मे समृद्ध्यताम्। उप माऽदो नमतु। अदः इति इष्टम् उच्यते। तद्यथा उपनमतु देवदत्तः मां प्रति। अदः यः मम कामो भवति। सः तत्कामं मां प्रति स्वयमेव उपनमतु स्वयमेव समीपमागच्छतु।

आनन्दबोधस्तु मन्त्रस्य भाष्यं स्पष्टतया प्रतिपादयति। अत्रापि शूद्रादीनां अध्ययनेऽधिकारः इति विषयः एव न विचारितः।

**अनन्ताचार्यभाष्यम्**

यथा येन प्रकारेण ज्ञानभक्तिवैराग्यत्मकेन जनेभ्यः शिष्यादिजनेभ्यः इमां बुद्धिस्थां कल्याणीं श्रीभगवद्विष्णुपरत्वेन मङ्गलात्मिकां वाचम् अहम् आवदानि सम्यक् वदामि। हे परमात्मन् त्वं मदीयां वाचं तथैवानुगृहाण। यानहमुपदेक्ष्यामि तेऽपि त्वत् प्रसादात् ज्ञानिनो भूयासुरित्यर्थः। यत्तदोर्नित्यसम्बन्धात् तथेत्यध्याहारः।

यद्वा—हे परमेश्वरः यस्य तव अग्न्यादयः सप्तसंसदः। पञ्च ज्ञानेन्द्रियाणि मनो बुद्धिश्चेति सप्तायतनाति अष्टमी भूतसाधनी भूतवशीकर्त्री वाक्। स त्वं नः अध्वनः सकामान् कुरु। अमुना कामेन





सज्ञानमस्त्विवति योजनीयम्। एषोऽर्थो बृहदारण्यकेऽभिहितः। तदेष श्लोको भवति–

अर्वाग्बिलश्चमस ऊर्ध्वबुन्धस्तस्मिन् यशो निहितं विश्वरूपम्। तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेति। अर्वाग्बिलश्चमस ऊर्ध्वबुन्ध इतीदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुन्धस्तस्मिन् यशो निहितं विशवरूपमिति। प्राणा वै यशो विश्वरूपम्। प्राणानेतदाह। तस्यासत ऋषयः सप्ततीर इति। प्राणा वा ऋषयः प्राणानेतदाह। वागष्टमी ब्रह्मणा संविदानेति। वाग्ध्यष्टमी ब्रह्मणा संवित्ते। (बृ.उ., २.२.३)

ब्रह्मराजन्याभ्यां शूद्राय। अत्रार्धऋक्। लिङ्गोक्तदेवत्या गायत्री। द्वितीयार्धऋक् मध्येऽवसनारहिता अनुष्टुप् लौगाक्षिदृष्टा। पूर्वार्चि जनेभ्य इत्युक्तम्। केभ्य इत्यत आह ब्रह्मराजन्याभ्याम्। ब्राह्मणाय क्षत्रियाय। शूद्राय अर्याय वैश्याय 'अर्यः स्वामिवैश्ययोः' (पा., ३.१.१०३) इति निपातः। स्वाय आत्मीयाय। अरण्याय पराय। नास्ति रणः शब्दः संग्रामो वा येन सह सोऽरण इति विग्रहः। रणशब्दे चकारचतुष्टयं प्रत्येकक्रियान्वयार्थम्। यथा अहं ब्राह्मणादिभ्यः कल्याणीं प्रियां वाचमवदानि तथा देवानाम् अहं प्रियः प्रीतिपात्रं भूयासं स्वर्गादौ। इह अस्मिन् लोके दक्षिणायै दक्षिणायाः आनतिसाधनभूतायाः दातुः च प्रियः भूयासम्। देवा दक्षिणादातारश्च मयि प्रीतिं कुर्वन्तिवत्यर्थः। किं च मे मम अयं कामः समृध्यताम् सफलो भवतु। किं च अदः इदं प्राणिजातं मा माम् उप नमतु प्रणमतु। सर्वजगत्प्रियो भूयासमिति भावः।

अनन्ताचार्योऽपि स्वभाष्ये मन्त्रस्यार्थ उपरोक्तविधिना अवोचत्। कुत्रापि तेन शूद्राणां वेदाध्ययने अधिकारः अस्तीति विचारः एव न प्रकटीकृतः।

**२.१. कृष्णयजुर्वेदः**

कृष्णयजुर्वेदीय तैत्तिरीयसंहितायामपि—तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः (तै.सं., ७.१.१.६), अनवक्लृप्तः अर्थात् असमर्थः।

**२.२. भाष्यभूमिका**

एवं श्रुतिगतपरम्परामवलम्ब्य शास्त्रगतपरम्परां च परिशील्य यदि विचारायामः तर्हि तैत्तिरीयारण्यके द्वितीयप्रश्ने श्रूयते–

ब्राह्मणेभ्यो वेदविद्भ्यो दिवेदिवे नमस्कुर्यात् (तै.आ., २.१५)

किं च भगवति श्रुतिः स्ववचनानुगुणमेवमपि वदति यत् 'स्वाध्यायोऽध्येतव्यः' इत्यत्र भाष्यविवरणानुगुणं वाक्यार्थः एवं स्फुटति यत् स्ववंशानुगुणं स्ववेदशाखैकदेशस्य नित्यमध्ययनं कर्तव्यम्। अत्र इयं विचिकित्सा समुदेति यदयमादेशः केषां कृते? किं जगति वर्तमानाः सर्वेऽपि वर्णाः वाक्यस्यास्याशयं स्वार्थेनेतुं शक्नुवन्ति? मैवम्। स्त्रीशूद्रयोः सत्युपायाबोधार्थित्वे हेत्वन्तरेण वेदाधिकारप्रतिषेधात्। उपनीतस्यैव अधिकार ब्रुवन्ननुपनीतयोस्तयोर्वेदाध्ययनमनिष्टप्राप्तिहेतुरिति बोधयति। पुराणादिभिस्तयोस्तदुपायावगमः। वेदाध्ययने तु त्रैवर्णिकानामेवाधिकारः नान्येषां इति तत् महर्षिभिः मुक्तकण्ठनैव समुद्घोषितम्। तत्र शूद्रादीनां नारीणां तत्र प्रवेशश्च नास्तीति प्रकटीकृतम्।

स्त्रीशूद्र-द्विजबन्धूनां त्रयी न श्रुतिगोचरा।

इति भारतमाख्यानं कृपया मुनिना कृतम्।। (श्रीमद्भग.,१.४.२५)

तस्मादुपनीतैरेव त्रैवणिकैर्वेदस्य सम्बन्धः। अत्र श्रुतिषु अनधिकारित्वात् भारतादिशास्त्रं व्यासेन प्रणीतमिति स्पष्टीकृतम्। तत्र तु श्रुति एवं स्मरयति यत्–

अष्टवर्षमानवकमुपनयीत, तमध्यापयीत (वे.भा.भू.सं., पृ.१०५)

अनेन शाखाग्रचन्द्रन्यायानुगुणं प्रसङ्गः आयाति उपनयने तावत् केषामधिकारेति। तत्र ब्राह्मण-क्षत्रिय-वैश्यादीनां द्विजातीनामेव उपनयनेऽधिकारः तदनुगुणं वेदाध्ययनेऽपि तेषामेव प्रसक्तिरिति। '*उपनीतस्येवाधिकारः*' इति प्रसक्तिः एवं आधानेऽपि त्रैवर्णिकानामेवाधिकारः नान्येषां स्त्री-शूद्रादीनाम्, तदर्थं तेभ्यः कालनिर्देशोऽपि ब्राह्मणे क्रियते यत्–

वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यो, शरदि वैश्यः।

(शत.ब्रा., २.१.३.५)





**३.१. ऋग्वेदः**

समाना मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमधि मन्त्रये वः समानेन वो हविषा जुहोमि।।

(ऋ.वे., १०.१९१.३)

**सायणभाष्यम्**

एकस्मिन् कर्मणि सह प्रवृत्तानामृत्विजां स्तोतृणां वा मन्त्रः स्तुतिः शस्त्राद्यात्मिका गुप्तभाषणं वा समाना एकबिधोऽस्तु। तथा समितिः प्राप्तिरपि समानी एकरूपास्तु। तथा मनः मननसाधनमन्तःकरणं चैषां समानम् एकविधमप्यस्तु। चित्तं विचारजं ज्ञानं तथा सह सहितं परस्परस्यैकार्थेनैकीभूतमस्तु। अहं च वः युष्माकं समानम् एकविधं मन्त्रम् अभिमन्त्रये। एकोविध्याय संस्करोमि। तथा वः युष्माकं स्वभूतेन समानेन साधारणेन हविषा चरुपुरोडाशादिना अहं जुहोमि।

अत्र सायणेन अध्ययनविषये किमपि न प्रतिपादितमस्ति।

**३.२. अथर्ववेदः**

ब्रह्मापरं यूज्यतां ब्रह्म पूर्व ब्रहआन्ततो मध्यतो ब्रह्म सर्वतः।
अनाव्याधां देवपुरां प्रपद्य शिवा स्योना पतिलोके वि राज॥

(अ.वे., १४.१.६४)

**सायणाभाष्यम्**

मन्त्रास्यार्थः स्पष्टत्वात् सायणेन भाष्यं पृथकतया नाभिहितम्। मन्त्रं परिशीलयामश्चेत् ब्रह्मणः सार्वात्म्यमत्र विचारतिमस्ति न कुत्रापि भवदुक्तप्रसङ्गः स्त्रीशूद्रादीनामध्ययनविषयः विचरितः। अतः ब्रह्मपरकार्थं एव स्वीकरणीयः।

**दयानन्दभाष्यम्**

ब्रह्म पहिले, ब्रह्म पीछे, ब्रह्म अन्त मे और मध्य मे, और ब्रह्म सर्वत्र ध्यान किया जावे। हे वधू! छेदनरहित देवताओं के गढ मे पहुंचकर कल्याणकारिणी और सुखदायिनी तु पतिलोक मे विराजमान हो।

अत्रापि दयानन्देन अध्ययनविषयः नालोचितः।

**४.१. श्रौतसूत्रम्**

**कात्यायनश्रौतसूत्रम्**

१. अङ्गहीनाऽश्रोत्रियषण्ढशूद्रवर्जम्

२. ब्राह्मणराजन्यवैश्यानां श्रुतेः

३. स्त्री चाऽविशेषात् (का. श्रौ., पृ. १.१.५,६,७)

नारीशूद्रादयः वेदेभ्यः सर्वदा वर्जनीयाः। ते च अनधिकारिणः भवन्तीति सूत्राणामाशयः।

**४.२. गृह्यसूत्रम्**

वैखानसगृह्यसूत्रे अस्मिन् विषये एवमुक्तमस्ति यत्

१. ब्राह्मणस्य पालाशो बैल्वो वा केशान्तो निर्व्रणोऽनुन्मृष्टोऽनुद्वेजनो युपवदवक्रो दण्डः कृष्णमृगस्याजिनं मौञ्जी मेखला।

२. क्षत्रियस्य नैयग्रोदो ललाटान्तो दण्डो रौरवमजिनं मौर्वी मेखला।

३. वैश्यस्यौदुम्बरो नासिकान्तो दण्डो बास्तमजिनं शाणी मेखला। (वै.गृ,४.१,२,३)

अत्र शूद्राणां उपनयनविषये किमपि न चर्चितः। उपनयनाभावात् वेदाध्ययने अधिकारः नास्ति सूत्रस्याशयः।

**५.१. स्मृतयः**

विप्राः यदि परम्परां विस्मृत्य वेदाध्ययनं न करिष्यन्ति तर्हि ते शूद्रत्वं प्राप्नुवन्ति। उक्तं हि मनुना-

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥ (म.स्म.,२.१६८)

मतमिदमवलम्ब्य महर्षियाज्ञवल्क्योऽपि ब्रवीति यत्-

यज्ञानां तपसां चैव शुभानां चैव कर्मणाम्।





वेद इव द्विजातीनां निःश्रेयस करः परः॥ (या.स्मृ.,४०)

एवमेव मन्वादिस्मृतिचोदितेषु वाक्येषु उल्लिखितो दृश्यते। तत्र ब्राह्मणादीनां वर्णधर्मनिरूपणप्रसङ्गे एवमुक्तमस्ति यत्-

ब्राह्मणस्य- अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहचैव ब्राह्मणानामकल्पयत्॥
(म.स्मृ.,१.८८)

क्षत्रियस्य- प्रजानां रक्षणं दानमिज्याऽध्ययनमेव च।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समादिशत्॥
(म.स्मृ.,१.८९)

वैश्यस्य- पशूनां रक्षणं दानमिज्याऽध्ययनमेव च।
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च॥
(म.स्मृ.,१.९०)

शूद्रस्य- एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।
एतेषामेव वर्णानां शुश्रूषामनसूयया॥
(म.स्मृ.,१.९१)

एतौ श्लोकैरपि इदमेव स्पष्टीयते त्रैवर्णिकानामेव यागवेदाध्ययनादिष्वधिकारः वर्तते। शूद्राणां तावत् सेवादिकार्येषु एव प्रसक्तिः तदपि श्रद्धया, विशेषतया तेभ्योऽत्राध्ययनपदमेव नोच्चारितम्।

न केवलमध्ययने अपि तु वेदोपदिष्ट—यागादिष्वपि अनधिकारित्वम् एते लभन्तेऽति। तदपि मनुना प्रोच्यते यत्-

नास्ति स्त्रीणां पृथक् यज्ञो न व्रतं नाप्युपोषितम्।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते॥ (म.स्मृ., ५.१५३)

किञ्च तेभ्यः मन्त्रेभ्यः एताः वारणीयाः इत्यपि श्लोघ्यते यत्-

नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्मे व्यवस्थितिः।
निरिन्द्रियाः ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः॥
(म.स्मृ.,९.१८)

न केवलं स्मृत्यादिषु सर्वत्रापि स्त्री-शूद्रादयः अनधिकारिणः भवन्तीति समुल्लेखितम्।

### ४.२. दर्शनानि

मीमांसादर्शनस्य षष्ठाध्याये शूद्रस्याधिकारः निरासः। न च दर्शपूर्णमासादौ शूद्रस्यापि अधिकारः स्यात् तस्यापि स्वर्गकामस्यादिति वाच्यम्? पुरुषविशेषणत्वेनाश्रुताया अप्यध्ययनविधिसिद्धाया विद्याया अग्निसाध्येषु कर्मस्वाधानसिद्धाग्निमन्तायाश्चाधिकारि-विशेषणत्वात्। अतः, न शूद्रस्य कृते अध्ययनविधिः। अतएव अध्ययनविधिसिद्धविद्याया अभावात् यागादिकर्मण्यपि न अधिकारः (शाबरभाष्यम्, पृ.६४)। ब्रह्मसूत्रे अपशूद्राधिकरणेऽपि (१.३.९.३४-३८)

१. शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि। (ब्र.सू.,१.३.९.३४)
२. क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररतेन लिङ्गात्। (ब्र.सू., १.३.९.३५)
३. संस्कारपरामर्शात्तदभावाभिलापाच्च। (ब्र.सू.,१.३.९.३६)
४. तदभावनिर्धारणे च प्रवृत्तेः। (ब्र.सू.,१.३.९.३७)
५. श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च। (ब्र.सू.,१.३.९.३८)

उपर्युक्तसूत्राणां अयमाशयः यत् तत्र शूद्राणां वेदाध्ययने अधिकारः नास्ति इति। अस्मिन् विषये ब्रह्मसूत्रादिग्रन्थेषु विस्तृतरूपेण विश्लेषणं परिलभ्यते।

### ५.३. श्रीमद्भागवद्गीता

श्रीमद्भगवद्गीतायां तृतीयोऽध्याये भगवद्वचनमिदं यत्-

सह यज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥ (गी.,३.१०)

अनेन ज्ञायते यत् सर्वे प्रजाः यज्ञेन सह सृष्टाः। अतः ईश्वरः पक्षपातात्मिकाबुद्धिरहितः। किञ्च वर्णानुगुणं तेषां उत्पत्तिं कृत्वा गुणकर्मानुसारेण विवाजितम्। यथाहि उपनिषत्सारहेतुभूतगीतायां चतुर्थोऽध्याये उच्यते-

चातुवर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥ (गी.,४.१३)





श्लोकेऽस्मिन् चतुर्णां वर्णानां सृजनं कृत्वा गुणकर्मानुसारं विभागः सम्पादितः भगवता। प्रसङ्गानुगुणं विव्रीयते वर्णानुगुणं कर्माणि, यथा-

ब्राह्मणस्य- शमोदमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मं कर्म स्वभावजम्॥
(गी.,१८.४२)

क्षत्रियस्य- शौर्य तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥
(गी.,१८.४३)

वैश्यशूद्रयोः- कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्॥
(गी.,१८.४४)

अत्रापि भगवता श्रीकृष्णेन चतुर्वर्णानां तत् तत् कर्माणि समुद्घोषितानि। तत्र सर्वत्र शूद्राणां वेदाध्ययनप्रसङ्गेऽधिकारः नास्तीति प्रतिपादितः।

### ५.४. महाभाष्यम्

एवमेव महाभाष्यकारपतञ्जलिरपि ब्राह्मणानां कृते स्वकृतमहाभाष्ये आदिदेश यत्-

ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।
(महा.भा.,१.३)

### निष्कर्षः

एवं श्रुतिस्मृतिपुराणग्रन्थादीनां वचनप्रमाणानामालोचनेन सर्वत्र एकमेव सिद्धान्तः प्रस्फुटितः यत् त्रैवर्णिकाः (ब्राह्मण-क्षत्रिय-वैश्याः), एव वेदाध्ययने अधिकारिणः भवन्ति। अन्येषां स्त्रीशूद्रादीनां उपनयनसंस्काराभावात् पुराणादिषु अधिकारत्वेऽपि श्रुतौ तु तेषामधिकारः न वर्तते इति निर्विवादसिद्धान्तः।

——

**सहायकग्रन्थसूची**


१. अथर्ववेदः, भा. सायणाचार्य, होशियारपुर, विश्वेश्वरानन्दवैदिकशोधसंस्थानम्, १९६१
२. अथर्ववेदः, भा. दयानन्दसरस्वती, अजमेर, वैदिकयन्त्रालय, १९८७
३. ऋग्वेदः, सम्पा. रामगोविन्दशास्त्री, वाराणसी, चौखम्बाविद्याभवन, २००७
४. कात्यायनश्रौतसूत्रम्, सम्पा. विद्याधरशर्मा, वाराणसी, चौखम्बासंस्कृतप्रतिष्ठान, २००५
५. पतञ्जलिः, महाभाष्यम्, सम्पा. गुरुप्रसादशास्त्री, दिल्ली, प्रतिभाप्रकाशन, २००६
६. मनुसंहिता, सम्पा. गङ्गानाथझा, दिल्ली, मोतीलालवनारसीदास, २०१२
७. तैत्तिरीयारण्यकम्, भा. भट्टभास्करमिश्र, दिल्ली, मोतीलालवनारसीदास, १९८५
८. मीमांसान्यायप्रकाशः राधेश्यामचतुर्वेदी, वाराणसी, चौखम्बासीरीजअफिस, २००९
९. याज्ञवल्क्यसंहिता, सम्पा. उमेशचन्द्रपाण्डेय, वाराणसी, चौखम्बासंस्कृतसंस्थान, २००८
१०. शुक्लयजुर्वेदः, (काण्वसंहिता), सम्पा. वि.आर.शर्मा, पुना, वैदिकसंशेधनमण्डल, १९९९
११. शुक्लयजुर्वेदः (माध्यन्दिनसंहिता), सम्पा. रामकृष्णशास्त्री, वाराणसी, चौखम्बाविद्याभवन, २०१३
१२. शतपथब्राह्मणम्, सम्पा. हरिस्वामी, दिल्ली, नागपब्लिशर्स, २००२
१३. श्रीमद्भागवतगीता, गोरखपुर, गीताप्रेस, २००७
१४. ब्रह्मसूत्रम्, भा. शाङ्करः, दिल्ली, मोतीलालवनारसीदास, २०१२
१५. मीमांसादर्शनम्, सम्पा. भूतनाथसप्ततीर्थ, कोलकाता, संस्कृतबुकडिपो, २००९






# क्त्वाप्रत्ययस्य भिन्नकर्तृकत्वभ्रमः

**समीरसाहा**

विदितचरमेव विदुषां यत्–समष्टिस्सर्वशास्त्राणां साहित्यमिति कथ्यते। अनेन वचनेन शास्त्रपरम्परासु विशिष्ठस्थानं भजते साहित्यशास्त्रमिति भावः। किन्तु साहित्यं किमिति प्रश्ने समादधाति कुन्तकाचार्यः–

सा काप्यस्थितिस्तचिदानन्दस्पन्दसुनिदरा।
पदादिवाक् परस्पन्दसारः साहित्यमुच्यते॥[१]

अर्थात् शब्दार्थयोः विशेषविन्यासभव्यैः साहित्यशास्त्रमिति निर्मितम्। शब्दार्थयोः सहभावः यदि साहित्यमिति स्वीक्रीयते तर्हि शब्दशास्त्रत्वेन व्याकरणशास्त्रस्य उपादेयता अवश्यम् अङ्गिकर्तव्या एव। यद्यपि साहित्यशास्त्रेऽस्मिन् षन्नां वेदाङ्गानाम् अभिनिवेशः, न्यायमीमांसादर्शनानां इतराश्च विद्यानामपि प्रायोगिकाभिनिवेशः, अपि च सुष्ठु समन्वयः दरीदृश्यते, तथापि विशेषतः **काणादं पाणिनीयं च सर्वशास्त्रोपकारकमिति** वचनप्रमान्यात् व्याकरणस्य उपकारकत्वं साहित्यकैः आत्मीकृतमिति निर्विवादविषयः। मुखं व्याकरणं स्मृतम् इति निरुक्तवचनप्रामाण्येन सर्वशास्त्रोपकारकत्वे सति व्याकरणस्य मुख्यत्वस्यं प्रतिपादनं सर्वेषु शास्त्रेषु यथा वर्तते तथा साहित्यशास्त्रेऽपि विहितमेव। विशेषतः लक्ष्यलक्ष्ये व्याकरणम् इति वचनात् व्याकरणशास्त्रस्य लक्ष्यानि साहित्ये एभ लभन्तो। व्याकरणशास्त्रनुपजीव्यैव शास्त्रमिदं प्रवृत्तम्। साहित्यशास्त्रतत्वधुरिणा आनन्दवर्धनेन अवादि—**प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमुलत्वात्सर्वविद्यानाम्। ते च श्रुयमानेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सुरिभिः काव्यतत्वार्थदर्शभिः वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेशो व्यञ्जकत्वसामायाद्**

**ध्वनिरिति उक्तः**,[२] इति कथनेन साहित्यात्मभुतं ध्वनितत्वस्य स्फोटवादगर्भान्तं व्याकरणेपकारकत्वं प्रमाणीक्रियते।

व्याकरणस्य उपादेयता यदि कैश्चित् नानुमन्यते चेत् काव्येषु च्युतसंस्कृतिदोषो भवति इति साहित्यविदः मम्मटः उवाद। अर्थात् उभयथा व्याकरणशास्त्रस्य प्रभुत्वं वर्तते एव। अतः आलङ्कारिकाः अपि व्याकरणस्य ज्ञानं प्राप्य स्वीयशास्त्रं पोषयामासुः। तेन च शास्त्रस्यास्य तत्त्वगाम्भिर्यं विकसितं पोषितञ्च, अपि च साहित्यज्ञानस्य विस्तारः जातः। अतः मुकुलभट्टः अपि सूचयति–

पदवाक्यप्रमाणेषु तदेतत् प्रतिबिम्बितम्।
यो योजयति साहित्ये तस्य वाणी प्रसीदति॥[३]

तत्र साहित्यग्रन्थपरम्परायां प्रथितयशः वस्तात्त्ववादि राजानकमहिमभट्टः। महिमभट्टः स्वीये व्यक्तिविवेके इति नामाख्ये ग्रन्थे ध्वनिं खण्डयितुं वस्तुतत्त्वाधारितविषयान् उल्लिखयामासः। तत्र नैकेंशाः प्रतिपादिताः यद्यपि विद्यन्ते तथापि तावत क्त्वाप्रत्ययस्य भिन्नकर्तृकत्वभ्रम इति विषयमुररिकृत्य शास्त्रापिपासुनां बुद्धिसमक्षं स्थापितः। अतः विषयोऽयं सविस्तरं सप्रमाणं प्रस्तूयते–

**विषयप्रतिपादनप्रसङ्गस्त्रोतः**

तत्र व्यक्तिविवेके—**केचित् पुनरेषां क्रियैवैका प्रवृत्तिनिमित्तमिति क्रियाशब्दत्वमेव सर्वेषां नामपदानामुपगच्छन्ति**[४] इति वर्तते। अनया पङ्क्त्या महिमभट्टः प्रतिपादयितुमिच्छति यत्—नामपदानां क्रियाप्रवृत्तिनिमित्तम्। अर्थात् नामवाचकाः शब्दाः सर्वे क्रियापरका इति। अमुं विषयं वर्णयितुं प्रधानायुधत्वेन वैयाकरणानां साहित्यिकानाञ्चापि पुरस्तात् आनीतं यत्—**यदि नामपदानां क्रियाप्रत्तिनित्तत्वं नानुमन्यते तर्हि कत्वा प्रत्ययस्य भिन्नकर्तृकत्वभ्रमः भवेत् एव**। अयं अस्ति विषयस्यास्य प्रतिपादनाय चिन्तनस्त्रोतः।

**विषयप्रतिपादनावधेयांशाः**

१. क्त्वाप्रत्ययविषयज्ञानम्।





२. अन्तरङ्ग-बहिरङ्गविषयाभ्यां क्त्वाप्रत्ययप्रतिपादनम्।
३. प्रयुज्यमानक्रियायाः पौर्वकालत्वविचारः।
४. उत्तरोत्तरक्रियापेक्षं पुर्वक्रियापुर्वकालः।
५. कृद्वाच्यतया कर्तुः उपाधिप्रतिपादत्वेन क्त्वाप्रत्ययः।
६. विषयविषयीभावाभ्यां क्त्वाप्रत्ययप्रतिपादनम्।
७. क्रियाविशेषणभावेन क्त्वाप्रत्ययः।
८. कर्तुः अविवक्षणात् क्त्वाप्रत्ययः।
९. क्रियायाः अविवक्षणात् क्त्वाप्रत्ययः।

**क्त्वाप्रत्ययस्य विषयज्ञानम्**

भगवता पाणिनिना—'समानकर्तृकयोः पुर्वकाले[५] इति सूत्रं क्त्वाप्रत्ययविधानाय सूचितम्। अर्थात् 'समानकर्तृकयोः धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्। क्त्वा तु अव्ययकृतो भावे। देवदत्तः भुक्त्वा व्रजति। द्वित्वमतन्त्रम्। स्नात्वा भुक्त्वा पीत्वा व्रजति।' इति सिद्धान्तकौमुद्याः वृत्ति। अनेन द्वयोः कर्तयोः समानकालत्वं क्त्वाप्रत्ययेन सिद्ध्यति इति तु स्पष्टम्।

**काशिकायाम्**

समानः कर्ता ययोधात्वर्थयोः तत्र पूर्वकाले धात्वर्थे वर्तमानद्धातोः क्त्वा प्रत्ययो भवति। शक्तिशक्तिमतोभेदस्य विवक्षित्वात् अविवक्षिततत्वात् समानकर्तृता। भुक्त्वा व्रजति पीत्वा दत्वा व्रजति। समानकर्तृकयोरिति किम्? भुक्तवति ब्राह्मणे गच्छति देवदत्तः। पूर्वकाले इति किम्? व्रजति च जल्पति च। आस्यं व्यदाय स्वपिति चक्षुः सम्मील्य हसतीत्युपसंख्यानम् अर्पुकालत्वात् इति वार्तिकम्।

उभयोः वृत्योः पर्यालोचनेन बुध्यते यत्—समानकर्तृकयोः धात्वर्थयोः पूर्वकाले धात्वर्थे वर्तमानद्धातोः क्त्वाप्रत्ययः भवति।

**क्त्वा प्रत्ययाभिन्नः ल्यप्-प्रत्ययः**

क्त्वाप्रत्ययस्य स्थाने ल्यप् इत्यस्य प्रत्ययस्य आदेशः भवति। पूर्ववत् समानकर्तृर्थे ल्यप् प्रयुज्यते इति बोधः। सूत्रं यथा–

समासेऽनञ्पूर्वे क्त्वो ल्यप्।[६]

अव्ययपूर्वपदेऽनञसमासे कत्वो ल्यबादेशः स्यात्। तुक्। प्रकृत्य। अनञ् किम्? अकृत्वा। पर्युदासाश्रयणान्नेह–परमकृत्वा।

**क्त्वाप्रत्ययस्य धायकसूत्राणि**

अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा।[७]

प्रतिषेधार्थयेरलंखल्वोरुपपदयोः क्त्वा स्यात्। प्राचां ग्रहणं पूजार्थम्। अमैवाच्येन इति नियमान्नोपपदसमासः। दो दद्धो अलं दत्वा। धुमास्था पीत्वा खलु। अलं खल्वोः किम्? मा कार्षीत्। प्रतिषेधयोः किम्? अलंकारः। अलं कृत्वा। खलु कृत्वा। अलङ्खल्वोरिति किम्? मा कार्षीः। प्रतिषेधयोरिति किम्? अलङ्कारः। प्राचां ग्रहणं विक्लपार्थम्— अलं रोदनेन। अत्र तु प्रसङ्गः प्रतिषेधे एव भवतीति नियमः।

उदीचां माडो व्यतीहारे।[८]

अपमित्य हरति। अपमित्य याचेत्। इहापि नाङ् धातोः व्यतीहारसमानकर्तृकत्वे एव क्त्वाप्रत्ययः।

परावरयोगे च।[९]

परावराभ्यां योगः परावरायोगः। परेण पूर्वस्य योगे गम्यमाने अवरेण च परस्य धातोः क्त्वा प्रत्ययो भवति। परेण तावत्—अप्राप्य नदी पर्वतः स्थितः। परनदीयोगेन पर्वतो विशिष्यते। अवरयोगे–अतिक्रम्यत पर्वतं नदी स्थिता। अवरपर्वतययोगेन नदी विशिष्यते।

अभीक्ष्ण्ये णमुलच।[१०]

पौनः पुन्ये द्योत्ये पूर्वविषये णमुल् स्यात् क्त्वा च। द्वित्वम्। स्मारं स्मारं नमति शिवम्। स्मृत्वा स्मृत्वा। पायं पायम्। भोजम्भोजम्। श्रावं श्रावम्। पीत्वा पीत्वा। भुक्त्वा भुक्त्वा, श्रुत्वा श्रुत्वा।

न यद्यनाकाङ्क्षे।[११]

यच्छब्दे उपपदे पूर्वकाले यत्प्राप्तं तन्न, यत्र पूर्वोत्तरे क्रिये तद्वाक्यमपरं नाकाङ्क्षति चेत्। यदयं भुहक्ते ततः पठति। इह क्त्वाणमुलौ न। अनाकाङ्क्षे किम्? यदयं भुक्त्वा व्रजति ततोऽधीते।





विभाषाग्रेप्रथमपूर्वेषु।[१२]

आभीक्ष्ण्य इति नानु वर्तते। एषुपपदषु समानकर्तृकयोः पूर्वकाले क्त्वाणमुलौ वा स्तः। अग्रे भोजं व्रजति, अग्रे भुक्त्वा।

क्त्वा प्रत्ययविधायिकानां सूत्राणां पर्यालोचनेन अवगम्यते यत् क्त्वा प्रत्ययः, तत्स्थाने ल्यप्, णमुलप्रत्ययो वा समानकर्तृकस्थले भवतीति। न केवलानि एतानि सूत्राणि वर्तन्ते इतोऽपि–

१. अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमूला[१३]

२. तिर्यच्यपवर्गे[१४]

३. स्वाङ्गेतस्यप्रत्यये कृभ्योः[१५]

४. तूष्णीमि भुवः[१६]

५. अन्वाच्यानुलोभ्ये[१७]

एतेषु सूत्रेष्वपि क्त्वाप्रत्ययस्य समानकर्तृतत्वमेव प्रतिपादितम्। अर्थात् समानकर्तृकत्वस्थले क्त्वाप्रत्ययस्य प्रवृत्ति इति निश्चप्रचम्।

किन्तु क्त्वाप्रत्ययस्य समानकर्तृकत्वमिति विषयं विहाय भिन्नकर्तृकत्वं वर्तते इत्यपि अङ्गिकार्यः एव। इह क्त्वा प्रत्ययस्य नियमस्य अतिव्याप्तिः दृश्यते। तर्हि किमत्र समाधेयमिति प्रश्ने सौदाहरणं प्रस्तुयते–

शास्त्रं लोकात् नातिरिच्यते इति न्यायानुसारं शास्त्रमपि लोकव्यवहारात् प्रवर्तते इति नियमः। यतोऽहि व्यवहारप्रतितिभ्यां अर्थसिद्धिः जायते, तेनैव व्याकरणशास्त्रव्यवहारः व्यवहारेष्वपि वरिवर्ति। क्त्वाप्रत्ययस्य व्यवहारिकप्रयोगस्तावत् इत्थम्—आगत्य दशदिनानि आसन्, गत्वा पञ्चक्षणाः व्यतिता इति।

अत्र आगमनकर्ता कश्चन आगन्ता, अपि च सत्ताक्रियायाः कर्ता दिनानि। अत्र आगत्य इति क्त्वाप्रत्ययस्थाने ल्यप् प्रत्ययान्तप्रयोगः समासेऽनञ्पूर्वे क्त्वो ल्यप् इति सूत्रेण।

शङ्का व्यवहारवाक्येऽस्मिन् समानकर्तृकत्वं तु नास्ति। द्विकर्तृत्वं भाति, तर्हि किं समाधानम्?

पुनश्च कालिदासस्य रघुवंशे-

अवजानासि मां यस्मादतस्ते न भविष्यति।
मत्प्रसुतिमनाराध्य प्रजेति त्वां शशाप स॥[१८]

अस्मिन् श्लोके मत्प्रसुतिमनाराध्य प्रजा न भविष्यति इत्यत्र अनाराधनक्रियायाः कर्ता प्रकरणवशात् दीलिपः। भाविकालीनसत्त्वाक्रियायाः कर्ता प्रजा भिन्नः। अर्थात् कर्ता द्वयं वर्तते। समानकर्तृकत्वं नास्ति अत्र। आराध्य इत्यत्र ल्यप्प्रत्ययान्तप्रयोगः।

अन्यच्च अप्पयदीक्षितेन कुवलयानन्दनामके अलङ्कारग्रन्थे विषमालङ्कारस्य उदहरणसन्दर्भे एवं लिलेख-

भक्ष्याशयाऽहिमञ्जुषां दृष्ट्वाखुस्तेन भक्षितः।[१९]

श्लोकेऽस्मिन् दर्शनक्रियायाः कर्तृत्वम् आखोः भक्षणक्रियायाः कर्तृत्वं सर्पस्येति। तर्हि कथं दर्शनक्रियायाः क्त्वाप्रत्यय भिन्नकर्तृकत्वे सत्यपि? क्त्वाप्रत्ययः। दृष्ट्वा इति अमरुशतके काव्यप्रकाशस्य उदाहरणश्लोकः यथा-

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः
निद्राब्जमुपागतस्य सुचिरं निवर्ण्य पत्युमुर्खम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीम्
लज्जानम्रमुखि प्रियेण हसता बाला चिरं चुम्बिता॥[२०]

इत्यत्र विलोकयनोत्थाननिर्वणपरिचुम्बनालोकानां कर्त्री वाला। किन्तु चुम्बनक्रियया: कर्ता भवति प्रियः। कथमन्तिमस्य आलोकनधात्वर्थस्य क्त्वाप्रत्ययः?

भगवद्गीतायाः अर्जुनविषादयोगे-

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्।
सीदन्ति मम गात्राणि मुखं च परिशुष्यते॥[२१]

दृष्ट्वा इत्यत्र दर्शनक्रियायाः कर्ता भिन्नः, अपि च सीदनक्रियायाः कर्ता भिन्नः। अतः द्वयोः भिन्नकर्तृकत्वमस्ति एव।

**पाणिनीयाष्टाध्यायां कश्चन प्रयोगः**





केशेषु केशेषु गृहित्वा इदं इदं युद्धं प्रवृत्तम् इति। केशाकेशि रूपं सर्वजनवेदितम्। सूत्रप्रमाणम्- तत्र तेनेदमिति सरूपे।[२२]

अर्थात् प्रयोगः इत्थं ज्ञायते यत्—सप्तम्यन्ते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं युद्धं प्रवृत्तमित्यर्थे समस्येते कर्मव्यतिहारे द्योते, स बहुव्रीहि इति शब्दाद्वयं विषयविशेषो लभ्यते।

उपरिउक्ते उदाहरणे ग्रहणक्रियायाः कर्ता द्वौ युद्धारौ, अपरत्र प्रवृत्तिक्रियायाः कर्तृत्वं युद्धस्य। अतः कर्तारौ सत्ये भिन्नकर्तृकत्मप्रसङ्गः भगवान्पाणिनये आर्षप्रयोगे आपतितः।

आर्षव्यवस्थायाः आशङ्कयाः समाधानाय तत्परः बालमनोरमाकारः समादधाति अत्र न च कोशग्रहणस्य पुरुषकर्तृकत्वात् प्रवृत्तेश्च युद्धकर्तृकत्वात् समानकर्तृकत्वाभावात् क्त्वा प्रत्ययः इति वाच्यम्। गृहित्वा इत्यनन्तरं स्थितयोरित्यध्याहारात्। ततश्च अस्य केशेषु सः, तस्य केशोष्वयमित्येवं परस्परं गृहित्वा स्थितयोरिदं युद्धं प्रवृत्तमिति फलितम्।

**समाधानम्**

केशेषु केशेषु गृहित्वा इदं युद्धं प्रवृत्तम् इत्यस्मिन् व्यासवाक्ये भिन्नकर्तृकत्वभ्रमः अपनाय स्थितयोः इति अध्याहारः करणीयः। तेन च केशेषु केशेषु गृहित्वा स्थितयोः इदं युद्धं प्रवृत्तम् इति भावः ग्राह्यः।

**भिन्नकर्तृकत्वभ्रमनाशाय शेखरकारः**

प्रातः काले शिवं दृष्ट्वा निशि पापं व्यपोहति—इत्यादौ क्रिययोरेककर्तृकत्वाभावत्कथं क्त्वाप्रत्यय इति वाच्यम्। एतादृशे विषये स्थितस्येत्यादेरधाहारेण समानकर्तक्त्वस्योपपादनात्।२३

नागेशस्य वचनशिष्ठप्रमाणात् अस्माभिः अङ्गिकार्यः एव यत् न वर्तते क्त्वाप्रत्ययस्य भिन्नकर्तृकत्वम्। अपि तु समानकर्तृकत्वमेव वर्तते। अतः उपरि दत्तेषु उदाहरणेषु अनेन क्रमेण समाधानं विधातव्यम्-

व्यवहारिकप्रयोगे- आगत्य स्थितस्य मे दशादिनान्यासन्।

कालिदासीयरघुवंशे- मत्प्रसुतिमनाराध्य स्थितस्य ते सन्ततिः न भविष्यति।

कुवलयानन्दे- अहिमञ्जुषो दृष्ट्वा स्थितः आखुः तेन भक्षितः।

अमरुशतके- जातपुलकां गण्डस्थलीं विलोक्य स्थिता बाला प्रियेण चुम्बिता।

अर्जुनविषादयोगे- स्वजनं दृष्ट्वा स्थितस्य मे गात्राणि सीदन्ति।

अन्यच्च- श्रीशैलशिखरं दृष्ट्वा पुनर्जन्म न विद्यते।

समाधानम्- श्रीशैलशिखरं दृष्ट्वा स्थितस्य पुनर्जन्म न विद्यते।

एवं स्नात्वा कनखले पुनर्जन्म न विद्यते

समाधानम्- एवं स्नात्वा कनखले स्थितस्य पुनर्जन्म न विद्यते।

लघुशब्दन्देशेखरस्य-

प्रातः काले शिवं दृष्ट्वा स्थितस्य निशिपापं व्यपोहति।[२४]

सम्प्रति व्यक्तिविवेकारस्य महिमभट्टस्य दिशा चर्चायाः अस्याः सौदाहरणं भिन्नकर्तृकत्वभ्रमः दर्श्यते।

प्रथमोदाहरणम्—विपच्य घटः[२५] भवति इति कश्चन प्रयोगः। प्रयोगेऽस्मिन् विपच्य इति ल्यवन्तप्रयोगः। अत्रापि समानकर्तृकत्वं भवेत् इति शिष्ठनियमः। अत्र तु सः नियमः लङ्घितः। अतः समाधानं उच्यते- भवति इत्यादि बहिरङ्गक्रियायाः अपेक्षया पौर्वकालिकम् अस्वीकार्यम् अपि तु घटतीति। यथा-

विदुरनीतौ- घटः इत्यनेन घटनक्रियायाः पौर्वकाल्यम् अङ्गीकार्यम् इति।

द्वितीयं यथा—अधिश्रित्य पाचकः[२६] भवति इत्यत्र भिन्नकर्तृकत्वभ्रमः पाचकः इत्यत्र पचति इति पाचकः इत्यनेन पचनक्रियायाः पौर्वकाल्यम् आश्रयेन विपचनक्रियायाः घटनक्रियायाश्च समानकर्तृकत्वम्।

तृतीयं यथा—प्रयुज्यमानक्रियायाः पौर्वकालम्-

श्रुत्वापि नाम वधिरो दृष्ट्वाप्यन्धो जडो विदित्वापि।
यो देशकालकार्यव्यपक्षया पण्डितः स पुमान्।।[२७]

श्रुत्वा, दृष्ट्वा, विदित्वा इमे क्त्वाप्रत्ययानन्तशब्दाः। किन्तु एतेषां





भिन्नकर्तृकत्वं प्रतिभाति एव। अतः समाधानाय उच्यते—प्रयुज्यमानक्रियापेक्षमेव च प्रायेण पौर्वकाल्यं क्त्वाप्रत्ययविषयः न प्रतीयमानपेक्षम्।[२८] अर्थात् विद्यमानासु क्रियासु प्रयुज्यमानाक्रियायाः एव पौर्वकाल्यम् अस्ति इति मन्तव्यम्। महिमभट्टेन समाधितम्—श्रुत्यादिशक्तिविरहलक्षणबाधिर्यादि क्रियापेक्षमेव श्रुवणादीनां पौर्वकाल्यमिति न काचिदनुपपत्तिः।[२९]

तुरीयः यथा—क्रियावाहुल्येन पौर्वकालत्वविचारः-

स्नात्वा भुक्त्वा पीत्वा ब्रजति इति।[३०]

प्रयोगे अस्मिन् क्त्वाप्रत्यप्रयोगबाहुल्यं वर्तते। बाहुल्ये सति पौर्वकाल्यं कुतः इति निर्णेयम्। यतो हि कर्तुः अभावात् क्रियायाः पौर्वकाल्यम् असाधनीय इति। अतः समाधीयते यत् अन्तरङ्गकालापेक्षया पौर्वकालिकत्वं स्वीकार्यं न तु बहिरङ्गक्रिया ब्रजति इत्यपेक्षया। आचार्यस्य वचनमत्र—वह्वीषु च तासुत्तरोत्तरक्रियापेक्षं पूर्वपूर्वक्रियापौर्वकाल्यम्।[३१]

**पञ्चमम्—कृद्वाच्यतया कर्तुरपाधिभावं गमितेति भिन्नकर्तृकत्वभ्रमः**

शिशिरकालमपास्य गुणोऽस्य नः क इव शीतहरस्य कुचोष्पणः।
इति धियास्तरुषः परिरेभिरे घनमतो नमतोऽनुमतान् प्रियाः॥[३२]

इह शिशिरकालमपास्य अस्य शीतहरस्य नः उष्मणः कः गुणः? इति अन्वये अपपूर्वक असुधातोः कथं क्त्वा प्रत्ययः?

प्राप्ते भ्रमे विषये स्मर्तव्यः यत्—वस्तुतः कर्ता तिङवाच्यः कृद्वाच्यो वा भवति। यथा गच्छति-गमनकर्ता, गन्ता-गमनकर्ता। कर्तुः कृद्वाच्यतया उपाधिभावं गमिता क्रिया भिन्नकर्तृकत्वभ्रमाय भवति- अप्राधान्यात् कर्तारं प्रति विशेषणभावे प्रापिता तस्याः निमग्नत्वात् तदपेक्षभिन्नकर्तृकत्वभ्रमः इति रुय्यकः।[३३]

**समाधानम्**—अपासनक्रियायाः कर्तुः उष्मणः शीतहरस्य क्रियाकर्तृत्वमपि अस्तीति समानकर्तृकत्वम्। शीतहरक्रियाकर्तुः उपाधितया अभिहिता। अतः भिन्नकर्तृकत्वभ्रमः।

अत एव केचन भ्रान्त्या अपास्य इति ल्यवन्तप्रतिरुपकम् निपातः व्यख्यातवन्तः इति व्यक्तिविवेककारः।[३४]

**विषयविषयिभावेन भिन्नकर्तृकत्वभ्रमः**

भारवेः किरातार्जुनीये–

निरीक्ष्य संरम्भनिरस्तधैर्यं राधेयमाराधितजामदग्न्यम्।
असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योरपि पक्षपातः॥[३५]

'राधेयं निरीक्ष्य मृत्योः भयेषु पक्षपातः जायेत' इति वाक्ये भयपक्षपतनक्रियायां विषयविषयिभावः अवगन्तव्यः।

मल्लिनाथवचनम्—अत्र जनिक्रियापेक्षया समानकर्तृकत्वाभावेऽपि पक्षपातक्रियापेक्षया तत्सम्भवान्निरीक्ष्येति ल्यबनिर्देशः समर्थनीयः।[३६]

व्यक्तिविवेककारः—अत्र प्रधानोपसर्जनभावस्त्वप्रयोजकः पक्षे च पतति अर्थात् मृत्युः पश्यति, विभेति अपि पक्षपातक्रियामाश्रित्य भयक्रियाविषयः इति भावः।

क्रियान्तरपेक्षयानुभूतकारकान्तरसम्बन्धे यथा–

यां दृष्ट्वापि समुत्सके मनसि मे नान्या करोत्यस्मदम्।[३७]

इत्यत्र दर्शनक्रियाकर्तुर्मनसोऽन्यकर्तुकास्पदक्रियानधिकरणभावे–नोपात्तस्यौत्सुक्यक्रिया विशेषणाभावेनोपात्ता। औत्सुक्यक्रियायाः विशेषणभावेन ग्रहणम् आश्रयणीयम्।

**क्वचिद् कर्तुः सम्बन्धितामुपगतासौ भ्रमहेतुः**

स्मर संस्मृत्य न शान्तिरस्ति मे इति।[३८]

अत्र कर्तुः सम्बन्धतायाः कारणेन भ्रमः। किन्तु अस्मिन् विषये स्थितस्य इत्यस्य नागेशभट्टप्रमाणेन स्वीकर्तव्यम्। तेन च संस्मरणक्रियायाः स्थितिक्रियायाश्च समानकर्तृकालः सम्बन्धितां गता क्रिया भिन्नकर्तृकत्वभ्रमहेतुः। समाधानम्- संस्मृत्य स्थितस्य मे शान्तिः नास्ति।

कर्तृपदस्य अकथनं भ्रमहेतुः—कर्ता च द्विविधः। शुद्धः संकीर्णश्च। शुद्धस्तावतक्रियान्तरापेक्षयानुभूतकारकान्तरसम्बश्च।





शुद्धस्योदाहरणम्–

श्रीशैलं शिखरं दृष्ट्वा पुनर्जन्म न विद्यते।

अत्र दर्शनकर्तुः अनिर्देशनात् भिन्नकर्तृकत्वभ्रमहेतुः। अतः समाधीयते—श्रीशैलशिखरं दृष्ट्वा स्थितस्य पुनर्जन्म न विद्यते।

संकीर्णस्योदाहरणम्–

ननु सर्व एव समवेक्ष्य कमपि गुणमेति पुज्यताम्।
सर्वगुणविरहितस्य हरेः परिपूजया कुरुनरेन्द्र! को गुणः।[३९]

अत्र समवेक्षणं पूजनं च इत्ययोः द्वयोः कर्ता न उक्तः। कर्तुः अविवक्षया भ्रमहेतुः। किन्तु समवेक्षपूजयोः एकः लोकः कर्ता इति भावः ग्राह्यः।

क्रियया अविवक्षणात् भ्रमहेतुः–

अकृत्वा परसन्तापमगत्वा खलनम्रताम्।
अनुत्सृज्य सतां मार्गे यत् स्वल्पमपि तद्बहु॥[४०]

मनुष्यः परसन्तापम् अकृत्वा यत् लभते तद्बहु भवति इति वक्तव्ये यत्स्वल्पमपि तद्बहु इति कथनेन अकरणक्रियादीनाम् अकरणागमनानुत्सर्जनक्रियाणां समानकर्तृकत्वाभावे कथं क्त्वाप्रत्ययः इति सन्देहो जायते।

किन्तु व्यक्तिविवेकारस्य वचनम्—अत्र हि प्रकरणादिगम्यया लाभक्रियायाः अनुपादानां करणादीनां भिन्नकर्तृकत्वभ्रमः।[४१]

**निष्कर्षः**

एवम् अन्तरङ्गबहिरङ्गक्रियायाः पौर्वकाल्यम्, प्रयुज्यमानक्रियायाः, उत्तरोत्तरक्रियायाः, कृद्वाच्यस्य, विषयविषयीभावसम्बन्धेन, क्रियान्तरपेक्षानुभूतकारकान्तरसम्बन्धे, कर्तुः सम्बन्धितामुपगते, कर्तुः अविवक्षायां प्राप्ताः भिन्नकर्तृकत्वभ्रमहेतवः परिदृश्यन्ते। इमानि स्थलानि भ्रमजनकत्वानि सन्ति इति बुधजनैः अवगन्तव्यम्। किन्तु वस्तुतः समानकर्तृकयोः पूर्वकाले इति सूत्रस्य भिन्नकर्तृकत्वभ्रमोपाधिप्राप्तये केवलं भ्रमजनकाः विषयाः त्यजनीयाः।

अतः स्पष्टमत्र क्त्वाप्रत्ययस्य समानकर्तृकत्वम्। अतः महिमभट्टेनापि लिखितम्–

> कर्तुरुपाधितयोक्ता कृदवाच्यतया गतान्यगुणतां वा
> क्त्वो भिन्नकर्तृकत्वभ्रमाय भवति क्रियाऽवचश्च तयो।
> पौर्वापर्ये क्रियायां यद् वास्तवं तदपेक्षिणि
> क्त्वः पौर्वकाल्ये किं तासां प्राधान्येतरचिन्तया॥[४२]

महिमभट्टवचनेन ज्ञायते यत् भिन्नकर्तृकत्वभ्रमः सञ्ज्ञायते क्वचित्। भ्रमवशात् न खिन्नमनसा भाव्यं बुधैः यत् समानकर्तृकत्वम् अपगतमिति। एतदर्थं महिमभट्टकृतप्रयासेन अमा विचारितमिषद मया। न अयं विषयः नवीनः विद्वतपरम्परायां तथापि स्वीयबुद्ध्यानुशीलनाय लघुप्रयासोऽत्र विहितः।

——





**पादटीका**

१. वक्रोक्तिजीवितम्– १.३६
२. ध्वन्यालोकः– पृ. १३७–१४१
३. अभिधावृत्तिमातृका–कारिका– १४
४. व्यक्तिविवेकः– पृ. ३०
५. वैयाकरणसिद्धान्तकौमुदि– ३३२०–३.४.२१
६. तत्रैव– ३३३२–६.९.३६
७. वैयाकरणसिद्धान्तकौमुदि– ३३१६–३.४.१८
८. तत्रैव– ३३१७–३.४.१९
९. तत्रैव– ३३१९–३.४.२०
१०. तत्रैव– ३३४३–३.४.२२
११. तत्रैव– ३३४४–३.४.२३
१२. तत्रैव– ३३४५–३.४.२४
१३. तत्रैव– ३३८१–३.४.५९
१४. तत्रैव– ३३८२–३.४.६०
१५. तत्रैव– ३३८३–३.४.६१
१६. तत्रैव– ३३८५–३.४.६३
१७. तत्रैव– ३३८६–३.४.६४
१८. रघुवंशम्– १.७७
१९. कुवलयानन्द– पृ. २५५
२०. काव्यप्रकाशः– पृ. ४१
२१. श्रीमद्भागवत्गीता– १.१८
२२. वैयाकरणसिद्धान्तकौमुदि– ८४७–२.२.२३१
२३. लघुशब्देन्दुशेखरः– उत्तरकृदन्तप्रकरणम्– पृ. ८३९
२४. तत्रैव– पृ. ८३९
२५. व्यक्तिविवेकः– पृ. ३३
२६. तत्रैव– पृ. ३३
२७. तत्रैव– पृ. ३५
२८. तत्रैव– पृ. ३५
२९. तत्रैव– पृ. ३५
३०. तत्रैव– पृ. ३५

३१. तत्रैव- पृ. ३५, ३२. तत्रैव- पृ. ३५
३३. अलंकारसर्वस्वः, ३४. व्यक्तिविवेकः- पृ. ३५
३५. किरातार्जुनीयम्- ३.२१, ३६. तत्रैव-३, पृ ७८
३७. व्यक्तिविवेकः- पृ. ३५, ३८. तत्रैव- पृ. ३५
३९. तत्रैव- पृ. ३७, ४०. तत्रैव- पृ. ३७
४१. तत्रैव- पृ. ३७, ४२. तत्रैव- पृ. ३७

**सहायकग्रन्थसूची**

१. ध्वन्यालोक, व्याख्या, जगन्नाथपाठक, चौखम्बा विद्याभवन, वाराणसी, २०११
२. व्यक्तिविवेक, व्याख्या, रेवाप्रसादद्विवेदि, चौखम्बा संस्कृत भवन, वाराणसी, २०१६
३. काव्यप्रकाश, व्याख्या, श्रीहरिशङ्करशर्मा, चौखम्बा प्रकाशन, वाराणसी, २०१३
४. वक्रोक्तिजीवितम्, व्याख्या, श्रीपरमेश्वरदीन पाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१४
५. अभिधावृतिमातृका, व्याख्या. डा. रेवाप्रसाद द्विवेदी, चौखम्बा विद्याभवन, वाराणसी, २०११
६. कुवलयानन्द, व्याख्या. डा. भोलाशङ्कर व्यास, चौखम्बा विद्याभवन, वाराणसी, २०१३
७. अलंकारसर्वस्वम्, व्याख्या, त्रिलोकनाथ द्विवेदी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१६
८. रघुवंशम्, डा. श्रीकृष्णमपि त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१६
९. किरातार्जुनीयम्, बद्रीनारायणमिश्रः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१५
१०. वैयाकरणसिद्धान्तकौमुदी(मूलमात्र), चौखम्बा ओरियन्टलिया, वाराणसी, २०१३
११. लघुशब्देन्दुशेखरः (२), व्याख्या, गोपालशास्त्री नेने, चौखम्बा संस्कृत संस्थान, वाराणसी, २०१६





# मनुस्मृतौ प्रतिपादितवर्णव्यवस्थायाः परिशीलनम्

**डा. पूर्णचन्द्र उपाध्यायः**

ब्राह्मणोऽस्य मुखमासीद् बाहु राजन्यः कृतः।
उरू तदस्य यद्वैश्यः पदभ्यां शूद्रोऽजायत॥[१]

महामोहान्धकारेऽस्मिन् संसारे मानवीयजीवनयात्रायाः सम्यक्परिचालनार्थं सृष्टिकर्तुः निर्देशेन तदंशभूताः दिव्यचेतनानुप्राणिताः नैके ऋषयः स्वजमुषा धरामिमाम् अलंकृत्य बहुविधानि शास्त्राणि व्यवस्थाश्चः नैकाः व्यरचयन्। तेष्वन्यतमः 'मनोरपत्यं पुमान् मानवः' इति व्युत्पत्तिं सार्थकीकुर्वन् मानवजातेः जनकः आदिपुरुषः महर्षिः मनुः मानवमात्रस्य पथप्रदर्शकः मानवसमाजस्य नियन्ता च इति निश्चिताभिधानम्। तदनेन भगवता मनुना मनुस्मृतिनामधेयः धर्मशास्त्रीयग्रन्थः प्रणीतः श्रुतिप्रामाण्यम् अनुकृत्य।

अपि च 'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा' सूक्तेरस्याः अन्वर्थतायाम् अस्मदीयां कालजयिसंस्कृतिमवलम्ब्य सम्पूर्णे विश्वे भारतवर्षस्य या प्रसिद्धिः वर्तते, तन्मूले निहितेषु शाश्वतजीवनमूल्यात्मकतत्त्वेष्वन्यतमं भवति 'वर्णाश्रमव्यवस्था'। एवमेव 'वसुधैव कुदुम्बकम्' इत्याख्याम् आर्षोक्तिमन्वर्थीकुर्वन्ती वैश्विकभावनानुप्राणिता नो संस्कृतिः स्वकीयदार्शनिकदृष्टिकोणेन सर्वथा समन्वयवादितामवलम्बते एव। तत्परिणामतः भारतीयसमाजे वर्णव्यवस्थायाः समुत्पत्तिः। यस्य मूलमन्त्रस्तु 'धर्मः' नाम कर्तव्यकर्मणः संविधानम्, येन मानवीयजीवनयात्रायाः मानवसमाजस्य च संधारणं सम्भवति। तदस्याः वर्णव्यवस्थायायाः तत्त्वावबोधनार्थं निम्नाङ्कितानि कतिपयानि आर्षवचनानि अवश्यं विवेचनीयानि-

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधुनामात्मनस्तुष्टिरेव च॥[२]
वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम॥[३]
धारणाद् धर्म इत्याहुर्धर्मो धारयते प्रजाः।
यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः॥[४]
यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।[५]
आहारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः॥[६]
न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥[७]
नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥
यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर॥[८]
कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥[९]
नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥
यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचरः॥[१०]

तदित्थम् अस्माकं प्राचीनशास्त्रेषु वर्णव्यवस्थायाः मूले निहितेषु मानवीयजीवनमूल्यात्मकतत्त्वेषु अन्यतमस्य धर्मस्य (कर्तव्यकर्मणः) स्वरूपविषयिणी व्याख्या बहुधा लभ्यते। परन्तु समुदायेन तद्विवेचनं सर्वथा दुष्करमेव।

**वर्णव्यवस्थायाः परिभाषा**

'वृञ्' वरणे धातोः 'घञ्' प्रत्यये 'वरयति इति वर्णः' इति





व्याकरणात्मकव्युत्पत्त्या कर्तव्यकर्मणः वरणं चयनं वा इत्यर्थे वर्णशब्दः व्यपदिश्यते। अतः सामाजिकव्यवस्थायाः संरक्षणार्थं कमपि विशिष्टवर्गं विशिष्टश्रेणीं वा (वर्णम्) आश्रित्य आत्मनैव चयितकर्तव्यकर्मणः सम्यक् सम्पादनम् एव वर्णव्यवस्था इति उच्यते। निरुक्ते यास्केनापि अस्मिन्नेवार्थे प्रतिपादयिषितम्—'वर्णो वृणोतेः' इति।

**वर्णव्यवस्थायाः मूलभूतम् आधारतत्त्वम्**

भारतीयमनीषिभिः वर्णव्यवस्थायाः मूलभूताधारतत्त्वत्वेन गुणकर्मणोः प्राधान्यं स्वीकृतम्। सर्वप्रथमम् अस्माभिः प्रमाणमस्य अस्मत्संस्कृतेः अस्मितायाः ऋग्वेदे प्राप्यते-

ब्राह्मणोऽस्य मुखमासीद् बाहु राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पदभ्यां शूद्रोऽजायत॥[११]

**गुणसिद्धान्तः**

सिद्धान्तेऽस्मिन् व्यक्तौ सन्निहिततदीयगुणानुसारमेव तस्य वर्णनिर्धारणं क्रियते। सिद्धान्तोऽयं सांख्यदर्शनमबलम्ब्य प्रवर्तते। सांख्यदर्शनानुसारं सृष्टिरेषा त्रिगुणात्मिका वर्तते। सत्त्वरजस्तमसु कस्यचिदेकस्य गुणस्याभावेन कस्यचिदपि अणोः परमाणोश्च सत्तापरिकल्पनम् असम्भवमेव। परन्तु यस्यां सृष्टौ यस्य गुणस्य प्राबल्यं भवति, सा सृष्टिः तदनुसारिणी व्यपदिश्यते। तदेतेषां त्रयाणां गुणानां स्वरूपम् इत्थं निरूपितम् आचार्येण ईश्वरकृष्णेन सांख्यकारिकायाम्-

(क) सत्त्वं लघु प्रकाशकम्।[१२]
(ख) उपष्टम्भकं चलं च रजः।[१३]
(ग) गुरुवरणकमेव तमः।[१४]

**१. सत्त्वम् (प्रकाशकम्), २. रजः (रागत्मकम्), ३. तमः (आवरणात्मकम्)**

तदत्र त्रयाणां गुणानां परिणतिस्तु इत्थं भवति-

**सत्त्वे**—शान्तिः, ज्ञानम्, तपः, शुद्धः आचरणश्च।
**रजसि**—कियाशीलता, राजसी प्रवृत्तिः, यशसः धनस्य च कामना।
**तमसि**—जडता आलस्यं च।

तदेवं श्वेतवर्णात्मको ब्राह्मणः निरासक्तो भवति। रक्तवर्णात्मकः क्षत्रियः वैश्यश्चापि यताक्रमं यशस्कामी धनसञ्चयकामी च भवतः। कृष्णवर्णात्मकः शूद्रस्तु सेवापरायणो भवति।

**कर्मसिद्धान्तः**

सिद्धान्तेऽस्मिन् व्यक्तिः स्वकर्मानुसारं वर्णविशेषस्य अधिकारी भवति। व्यवस्थेयं जन्म जातिं वा नैव अवलम्बते स्म। यः मनुष्यः यादृशं कर्म आचरति तदनुसारमेव सः वर्णधर्मित्वमवाप्नोति। सम्बन्धेऽस्मिन् अस्मत्प्राचीनशास्त्रेषु नैकानि प्रमाणानि प्राप्यन्ते। दिङ्मात्रमत्र कानिचन उपस्थाप्यन्ते–

शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्।
क्षत्रियाज्जातमेवं तु विद्याद् वैश्यात् तथैव च॥[१५]
योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥[१६]
इन्द्रो वै ब्रह्मणः पुत्रः क्षत्रिय कर्मणाऽभवत्।[१७]
शूद्रयोनौ हि जातस्य सद्गुणरानुपतिष्ठतः।
वैश्यत्वं लभते ब्रह्मण् क्षत्रियत्वं तथैव च॥[१८]
एतत्ते गुह्यमाख्यातं यथा शूद्रो भवेद्द्विजः।
ब्राह्मणो वा च्युतो धर्माद्यथा शूद्रत्वमाप्नुते॥[१९]

तदत्र उपर्युक्तेषु पद्येषु स्पष्टरूपेणैव निर्देशो वर्तते यद्, ब्रह्मकर्मरहितो ब्राह्मणः शूद्रत्वम् अधिगच्छति, तथैव शूद्रोऽपि यथाक्रमं वैश्यक्षत्रियाब्राह्मणोचितं कर्म सम्पादयन् उत्तरोत्तरवर्णस्य अधिकारी भवितुमर्हति।

तदेवं वरणं नाम कर्तव्यकर्मणः चयनपरिणतेरेव वर्णव्यवस्थायाः समुत्पत्तिः स्वीक्रियते। सिद्धान्तमिममनुसृत्य प्रत्येकवर्णगतसामाजिक-जीवननिमित्तं वर्णव्यवस्थेयं तावदेव उपादेयं महत्त्वपूर्णं चास्ति, यावत्खलु व्यक्तेः जीवनार्थं प्रत्येकस्यङ्गस्य। पुरुषसूक्तस्य प्रतिपाद्यमपि एतदेव। अपि च सिद्धान्तोऽसौ 'पुनर्जन्म' इत्यात्मकजीवनदर्शनस्य परिपोषकम्।





भगवता श्रीकृष्णेन तु स्पष्टरूपेण एव उक्तं यत्, गुणकर्मणोः आधारेण एव मया चत्वारो वर्णाः व्यवस्थपिताः–

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥[२०]

**वर्णचतुष्टयस्य सामान्यपरिचयः**

**ब्राह्मणः** (ब्रह्मतत्त्वस्य अधिकारी)

**क्षत्रियः** (रक्षायाः शासनकर्मणश्च अधिकारी)

**वैश्यः** (व्यवसायस्य व्यापारकर्मणः वा अधिकारी)

**शूद्रः** (उपर्युक्तनां समस्तानां सेवाकरणस्य अधिकारी)

**चतुर्णां वर्णानां धर्मः (कर्तव्यं कर्म)**

वर्णव्यवस्थायाः विकासनिमित्तम् आधारभूतं तत्त्वं तु धर्ममूलकं कर्म एव। अतः प्रत्येकवर्णस्य कर्तव्यं कर्म अपि निश्चितं वर्तते। वर्णचतुष्टयस्य कर्तव्यं कर्म मुख्यरूपेण द्विधा विभाजयितुं शक्यते–

धर्मः (कर्तव्यं कर्म)
सामान्यधर्माः — विशिष्टधर्माः

**सामान्यधर्माः**

चतुर्णां वर्णानां कृते त एते धर्माः अनिवार्यतया पालनीया एव। तद्धि–

(क) अहिंसायाः आचरणम्।
(ख) सत्यस्य नैरन्तर्येण अन्वेषणम्।
(ग) परधननिवृत्तिः।
(घ) चारित्रिकपवित्रता।
(ङ) इन्द्रियसंयमः।
(च) क्षमाशीलता दानशीलता चेत्यादयः।

**विशिष्टधर्माः**

धर्मशास्त्रकारैः प्रत्येकवर्णगतव्यक्तिनिमित्तं केचन विशिष्टधर्माः निर्धारिताः सन्ति। येन ते विशिष्टवर्णानाम् अधिकारित्वमधिगच्छन्ति।

त एते विशिष्टधर्मा एव **'वर्ण-धर्माः'** इति उच्यन्ते। तदेतेषां वर्णनम् इत्थम्-

**ब्राह्मणवर्णस्य विशिष्टधर्माः (कर्तव्यं कर्म)**

'ब्रह्म जानाति इति ब्राह्मणः' व्युत्पत्त्या अनया यो ब्रह्मतत्त्वं जानाति सः ब्राह्मण इति उच्यते। तदेवं प्रकारेण ज्ञानविज्ञानयोः पुरोधा इति कृत्वा ब्राह्मणः चर्तुषु वर्णेषु श्रेष्ठत्वमधिगच्छति। तदीयश्रेष्ठताया अपर एकः आधारो भवति तदीया सात्त्विकी प्रवृत्तिः निश्छलता च। अतोऽस्य स्थानं वर्णव्यवस्थायां प्राथम्यमाबहति।

श्रीमद्भगवद्गीतानुसारं ब्रह्मतत्त्वविदः ब्राह्मणस्य कर्तव्यं निम्नाङ्कितानुसारं निश्चीयते-

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्॥[२१]

मनुस्मृतौ ब्राह्मणस्य कर्तव्यम् इत्थं परिकल्पितम्-

अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्॥[२२]

तदेवं ब्राह्मणस्य कर्तव्यं यथाक्रमं गीतायां नवधा मनुस्मृतौ च षड्धा निरूपितम्।

**क्षत्रियवर्णस्य विशिष्टधर्माः (कर्तव्यं कर्म)**

'क्षतात् त्रायते इति क्षत्रियः' व्युत्पत्तिमिमामाश्रित्य यः विनशनात् प्रजाः त्रायते स एव क्षत्रियपदवाच्यः। तदेवं बलस्य पराक्रमशालितायाश्च कारणात् क्षत्रियः प्रजारक्षकः शासकश्च भवति। वर्णव्यवस्थायामस्य स्थानं द्वितीयकम् अस्ति। श्रीमद्भगवद्गीतायां क्षत्रियस्य निम्नाङ्कितं कर्तव्यजातं निर्धारितमस्ति-

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
ज्ञानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥[२३]

मनुस्मृतौ तु क्षत्रियस्य कर्तव्यजातम् इत्थं संदिष्टम्-

प्रजानां रक्षणं दानमिज्याध्ययनमेव च।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः॥[२४]





तदेवं क्षत्रियस्य कर्तव्यं यथाक्रमं गीतायां सप्तधा मनुस्मृतौ च पञ्चधा व्यपदिष्टम्।

**वैश्यवर्णस्य विशिष्टधर्माः (कर्तव्यं कर्म)**

व्यवसायमाध्यमेन यः धनसञ्चयं कुर्वन् राष्ट्रस्य आर्थिकीस्थितिसुदृढीकरणार्थं प्रयतते सः वैश्य इति संज्ञायते। वर्णव्यवस्थायामस्य स्थानं तृतीयकं भवति। श्रीमद्भगवद्गीतानुसारं वैश्यस्य निम्नाङ्कितकर्तव्यानि निर्धार्यन्ते-

कृषिगोरक्षवाणिज्यं वैश्यकर्म स्वभावजम्।[२५]

मनुस्मृतिप्रतिपाद्यानुसारं तु अधोलिखितानि कर्तव्यानि परिकल्प्यन्ते-

पशूनां रक्षणं दानमिज्याऽध्ययनमेव च।
वणिकपथं कुसीदं च वैश्यस्य कृषिमेव च॥[२६]

तदित्थन्तया क्षत्रियस्य कर्तव्यानि यथाक्रमं गीतायां त्रिधा मनुस्मृतौ च सप्तधा निर्धारितानि।

**शूद्रवर्णस्य विशिष्टधर्माः (कर्तव्यं कर्म)**

उपर्युक्तानां त्रयाणां वर्णानां परिसेवया यः समाजस्य राष्ट्रस्य च विकासे स्वकीयां सक्रियभूमिकामाबहति स एव शूद्र इति संज्ञामादधाति। वर्णव्यवस्थायामस्य स्थानं चतुर्थकं भवति। श्रीमद्भगवद्गीतायाः प्रतिपाद्यानुसारं शूद्रस्य निम्नाङ्क्तानि कर्तव्यानि निर्धार्यन्ते-

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्।[२७]

मनुस्मृतौ शूद्रस्य कर्तव्यानि इत्थं निर्धारितानि-

एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।
एतेषामेव वर्णानां शुश्रूषामनसूयया॥[२८]

तदेवं शूद्रस्य कृते प्रामुख्येन एकमेव कर्तव्यं निर्धारितम्।

**वर्णव्यवस्थायाः गुणाः**

गुणवत्तायाः दृष्ट्या वर्णव्यवस्थायाः निम्नाङ्कितवैशिष्ट्यानि विमर्शनीयानि-

(१) सांस्कृतिक-सामाजिक-धार्मिकव्यवस्थायाः संरक्षणम्।

(२) आध्यात्मिकसमुन्नतिः।

(३) व्यक्तिगतस्वतन्त्रतायाः संरक्षणम्।

(४) एकतात्मकभावनायाः संविधानम्।

(५) कार्यकुशलता।

कार्यगतकुशलतायाः सन्देशोऽस्माभिः भगवतः श्रीकृष्णस्य मुखारविन्दात् प्राप्यते। तद्धि-

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु॥[२९]

**वर्णव्यवस्थायाः दोषाः**

प्राचीनभारतीयमनीषिभिः सामाजिकव्यवस्थायाः सुप्रबन्धननिमित्तं निर्मिता वर्णव्यवस्था परवर्तिनि काले जातिव्यवस्थारूपेण परिवर्तिता। परिणामतः समाजे नैकाः विसङ्गतयः समुद्गताः। याः खलु भारतीयसमाजस्य संस्कृतेश्च अस्मिताविध्वंसकारिण्यः भवन्ति। तद्यथा-

(१) वर्ण-धर्मस्य निर्धारणं पूर्वं यत् कर्मगतम् आसीत् कालान्तरे तद् जन्मगतं जातम्।

(२) जन्मगताधारेण संकुचितभावनायाः उत्पत्तिः, तेन च अनेकतायाः समुत्पत्तिः।

(३) संकुचितजातिगतहीनभावनायाः कारणाद् राष्ट्रियभावनानाम् अवरोधः।

(४) युद्धे केवलं क्षत्रियवर्गस्य पराजयेन समग्रसमाजस्य पराजयवरणम्।

(५) असमानतायाः भावः, यथा- महाभारते एकलव्यकर्णाभ्यां साकम् अनुचितव्यवहारस्य प्रदर्शनम्।

**जातिवर्णव्यवस्थयोः भेदकतत्त्वानि**

जनाः सामान्यतया वर्णं जातिं च समानार्थकत्वेन व्यवहरन्ति। परन्तु वर्णव्यवस्था जातिव्यवस्था च नैव एकरूपे। तदेतयो अवधारणायां





यानि भेदकतत्त्वानि तानि अस्माभिः निम्नाङ्कितबिन्दुभिः प्रकाशयितुमिष्यन्ते-

**वर्णः**

(१) वर्णस्य निर्धारणं गुणं कर्म चाश्रित्य एव प्रवर्तते।

(२) वर्णव्यवस्थायां ऋजुता वर्तते।

(३) वर्णाः केवलं चत्वारो भवन्ति।

(४) वर्णव्यवस्थायाम् उपवर्णानां सर्वथा अभावो वर्तते।

(५) वर्णव्यवस्था केवलं भारतीयसमाजे एव लब्धसत्ताका।

**जातिः**

(१) जातेः निर्धारणं जन्मनि एव श्रयते।

(२) जातिव्यवस्था कठोरा भवति।

(३) जातीनां संख्या सहस्रं भवति।

(४) जातिषु उपजातयोऽपि भवन्ति।

(५) जातिप्रथा अन्ताराष्ट्रिया वर्तते।

**वर्तमानसमाजे वर्णव्यवस्थायाः प्रासङ्गिकता**

प्राचीनवर्णव्यवस्थायाः स्वरूपं योग्यतानुसारं व्यवसायकरणस्य स्वतन्त्रतां व्यक्तिगतस्वतन्त्रतां च प्रतिपादयति। अतः वर्तमानसमाजस्य कृते व्यवस्थेयम् एतदर्थं प्रासङ्गिकी वर्तते यत्, कश्चिदपि जनः स्वरुचेः अनुरूपमेव किञ्चिदपि कार्यं निजीकृत्य स्वयोग्यतां दक्षतां च प्रदर्शितुं समर्थो भवेत्। अपि च अद्यतनयुगे आजीविकानैराश्यगतसमस्यायाः समाधाने अस्याः भूमिका अत्यन्तम् उपादेयपूर्णा सिद्ध्येत।

**निष्कर्षः**

तदेवमुपर्युक्तविवेचनेन वयं निष्कर्षमिमम् अधिगच्छामो यत्, प्राच्यसंस्कृतौ प्रतिपादितवर्णव्यवस्था मानवजीवनस्य समाजस्य कृते च नैकबिधक्षेत्रेषु मनोवैज्ञानिकं तथ्यात्मकं विवरणमेव। व्यवस्थेयं प्रत्येकं मनुष्यस्यान्तःकरणे कर्तव्यपरायणताम्, ज्ञानम्, शक्तिम्, शान्तिं च धारयति। समाजस्य संघटनात्मकसंविधानदृष्ट्या वर्णव्यवस्थेयम् अद्यापि

तावन्ती एव प्रासङ्गिकी, उपादेयपूर्णा, महत्त्वपूर्णा च वर्तते यावन्ती एषा प्राचीनकाले।

अतः वर्णव्यवस्थेयं संस्कृतेः अस्मितापरिचायिका अपि च भारतीयसमाजस्य राष्ट्रस्य च विकासार्थं कालजयि वरदानमस्ति। अद्यापि चेदस्याः मूलभूतं सिद्धान्तम् उद्देश्यं च समुपयुज्येत तर्हि अद्यतनबहुविधसमसामयिकसमस्यानां समाधानं स्वतः भविता। यतोहि व्यवस्थेयं व्यक्तेः सर्वाङ्गीणविकासेन सह तदीयसकारात्मकभावनाम् आशावादितां च द्रढयति। इत शम्।

——





**पादटीका**

१. ऋग्. १०.९०.१२
२. मनु. २६
३. तत्रैव २१२
४. महाभारतम्
५. वैशेषिकदर्शनम्
६. हितोपदेशः १२५
७. श्रीमद्भगवद्गीता ३.५
८. गीता. ३.८-९
९. ईशावास्योपनिषद् २
१०. गीता. ३.८-९
११. ऋग्. १०.९०.१२
१२. सां.का. १३
१३. तत्रैव १३
१४. सां.का. १३
१५. मनु. १०.६५
१६. तत्रैव २.१६८
१७. महाभारतम्, शान्ति. २२.११
१८. तत्रैव, वन. २११.११
१९. तत्रैव, अनुशा. १४३.५९
२०. गीता. ४.१३
२१. तत्रैव १८.४२
२२. मनु. १.८८
२३. गीता. १८.४३
२४. मनु. १.८९
२५. गीता. १८.४४
२६. मनु. १.९०
२७. गीता. १८.४४
२८. मनु. १.९१
२९. गीता. १८.४५